पितॄणामाधिपत्यञ्च लोकपालत्वमेव च ।
मनुः प्रजापतिश्चैव सावर्णः स महायशाः ॥८१॥
भाव्यसौ नागते तस्मिन् मनुः सावर्णिकेऽन्तरे ।
मेरुपृष्ठे सुरम्ये वै अद्यापि चरते प्रभुः ॥८२॥
भ्राता शनैश्चरस्तस्य ग्रहत्वं स तु लब्धवान् ।
त्वष्टा तु तेनरूपेण विष्णोश्चक्रमकल्पयत् ।
तद्धाऽप्रतिहतं युद्धे दानवप्रतिवारणं ॥८३॥
यवीयसी तयोर्या तु यमुना च यशस्विनी ।
अभवत् सा सरिच्छ्रेष्ठा यमुना लोकभाविनी ॥८४॥
यस्तु ज्येष्ठो महातेजाः सर्गो यस्य तु साम्प्रतं ।
विस्तरं तस्य वक्ष्यामि मनोर्वैवस्वतस्य ह ॥८५॥
इदन्तु जन्म देवानां शृणुयाद्वा पठेत वा ।
वैवस्वतस्य पुत्राणां सप्तानान्तु महौजसां ।
आपदं प्राप्य मुच्येत प्राप्नुयाच्च महद्यशः ॥८६॥

इति श्रीमहापुराणे वायुप्रोक्ते श्राद्धकल्पे वरुणवंशवर्णनं नाम
द्वाविंशोऽध्यायः समाप्तः ।

अथ त्रयोविंशोऽध्यायः ।

श्राद्धकल्पे वैवस्वतमनुवंशवर्णनं ।

सूत उवाच। ततोमन्वन्तरेऽतीते चाक्षुषे दैवतैः सह ।
वैवस्वताय महते पृथिवीराज्यमादिशत् ॥१॥
तस्य वैवस्वतोऽवर्ष्यं साम्प्रतस्य महात्मनः ।
आनुपूर्व्येण वै विप्राः कीर्त्त्यमानं निबोधत ॥२॥
मनोर्वैवस्वतस्येह सर्गमादाय साम्प्रतं ।
मनोः प्रथमजस्यासन् नवपुत्रास्तु तत्समाः ॥३॥
इक्ष्वाकुर्नहुषश्चैव[1] धृष्टः शर्यातिरेव च ।
नरिष्यन्तस्तथा प्रांशुर्नाभागारिष्ट एव ।
करूषश्च पृषध्रश्च नवैते मानवाः स्मृताः ॥४॥
ब्रह्मणा तु मनुः पूर्वं चोदितस्तु निबोधत ।
स्रष्टुं प्रचक्रमे कामं निष्फलं समवर्त्तत[2] ॥५॥
अथाकरोत्पुत्रकामः परामिष्टिं प्रजापतिः ।
मित्रावरुणयोरंशे मनुराहुतिमावपत् ॥६॥
तत्र दिव्याम्बरधरा दिव्याभरणभूषिता ।
दिव्यसंहनना[3] चैव इडा जज्ञे इति श्रुतिः ॥७॥

---

(१) नङ्गुलश्चैवेति च० । नङ्गवश्चैवेति ङ ।
(२) तत् प्रकीर्त्तितमितिपाठो यद्यपि सर्व्वत्रैव वर्त्तते तथापि लिपिकर-प्रमादजनित एव ।
(३) दिव्यसंहनना इति ङ० च० ।

तामिलेत्यथ होवाच मनुर्द्दण्डधरः स्मृतः ।
अनुगच्छामि(१) भद्रन्ते तमिला प्रत्युवाच ह ॥८॥
धर्म्मयुक्तमिदं वाक्यं पुत्त्रकामं प्रजापतिं ।
मित्त्रावरुणयोरंशे जातास्मि वदतां वर ॥९॥
तयोः सकाशं यास्यामि मा नो धर्म्मो हतोऽवधीत्(२) ।
सैवमुक्त्वा पुनर्द्देवी(३) तयोरन्तिकमागमत ॥१०॥
गत्वान्तिकं वरारोहा प्राञ्जलिर्वाक्यमब्रवीत् ।
अंशेऽस्मि युवयोर्ज्जाता देवौ किं करवाणि च ॥११॥
मनुनैवाहमुक्तास्मि अनुगच्छस्व मामिति ।
तथा तु वदतीं साध्वीमिडामाश्रित्य तावुभौ ॥१२॥
देवौ च मित्त्रावरुणाविदं वचनमूचतुः ।
अनेन तव धर्म्मज्ञे प्रश्रयेण दमेन च ॥१३॥
सत्येन चैव सुश्रोणि प्रीतौ स्वो वरवर्णिनि ।
आवयोस्त्वं महाभागे ख्यातिं कन्या प्रयास्यसि(४) ॥१४॥
सुद्युम्न इति विख्यातस्त्रिषु लोकेषु पूजितः ।
जगत्प्रियो धर्म्मशीलो मनोर्व्वंशविवर्द्धनः ॥१५॥
मानवः स तु सुद्युम्नः स्त्रीभावमगमत(५) प्रभुः(६) ।

---

(१) परन्तु अनुगच्छस्वेति पाठदर्शनादत्रापि अनुगच्छस्व इति पाठो युक्तः ।
(२) अवधीदित्यत्र अन्यथा इति पाठः प्रयोक्तुं शक्यः ।
(३) महादेवीति ख० ग० ।
(४) कन्येति यास्यसि इति पाठः समीचीनः ।
(५) प्राप्तवानिति पाठः समुचितः ।
(६) पुनरिति ख० ङ० ज० ।

सा तु देवी वरं लब्ध्वा निवृत्ता पितरं प्रति ॥१६॥
बुधेनान्तरमासाद्य मैथुनायोपमन्त्रिता ।
सोमपुत्राद्बुधाच्चास्या ऐलो जज्ञे पुरूरवाः ॥१७॥
बुधात् सा जनयित्वा तु सुद्युम्नं पुनरागता ।
सुद्युम्नस्य तु दायादास्त्रयः परमधार्म्मिकाः ॥१८॥
उत्कलस्य गयश्चैव विनताश्व(१) स्तथैव च ।
उत्कलस्योत्कलं राष्ट्रं विनताश्वस्य पश्चिमं ।
दिक्पु वतस्य राजर्षेर्गयस्य तु गयापुरी ॥१९॥
प्रविष्टे मनौ तस्मिन् प्रजाः सृष्ट्वा दिवाकरः(२) ।
दशधा तद्दधत् चेत्रमकरोत् पृथिवीमिमां ॥२०॥
इक्ष्वाकुरेव दायादानन्यान् दश समाप्नुयात् ।
कन्याभावात्तु सुद्युम्नो नैनं भागमवाप्नुयात् ॥२१॥
वशिष्ठवचनाच्चासीत् प्रतिष्ठा नो महाद्युतिः ।
प्रतिष्ठा धर्म्मराजस्य सुद्युम्नस्य महात्मनः ॥२२॥
तत् पुरूरवसे प्रादात् राष्ट्रं प्राप्य महायशाः ।
मानवेभ्यो महाभागा स्त्रीपुंसोर्लक्षणं प्रति ।
मानवः स तु सुद्युम्नः स्त्रीभावमगमत् पुनः ॥२३॥
एतच्छ्रुत्वा तु ऋषयः पप्रच्छुस्तदनन्तरं ।
मानवः स तु सुद्युम्नः स्त्रीभावमगमत् कथं ॥२४॥

---

(१) विततास्व इति ख० ग०।
(२) प्रविष्टे मनावित्यादि श्लोकस्य पूर्व्वश्लोकेन सह सङ्गतिविरहात् एतत् श्लोक पूर्व्वं कतिश्लोकाः आदर्शपुस्तकेषु पतिताः प्रतिभान्ति ।

सूत उवाच । प्रोवाच वचनं देवी प्रियहेतोः प्रियं प्रिया ।
इमे ममाश्रमे देव यः पुमान् संप्रवेक्ष्यति ।
भविष्यति ध्रुवं नारी सा तुल्याप्सरसां शुभा ॥२५॥
तत्र सर्वाणि भूतानि पिशाचाः पन्नगाश्च ये ।
स्त्रीभूताः सह रुद्रेण क्रीडन्त्यप्सरसो यथा ॥२६॥
उमावनं प्रविष्टस्तु स राजा मृगयाकुलः ।
सह पिशाचैर्भूतैस्तु रुद्रैः स्त्रीभावमाश्रिते ॥२७॥
तस्मात् स राजा सुद्युम्नः स्त्रीभावं लब्धवान् पुनः ।
महादेवप्रसादाच्च गाणपत्यमवाप्नुयात् ॥२८॥

इति श्रीमहापुराणे वायुप्रोक्ते वैवस्वतमनोः सृष्टिकथनं नाम
त्रयोविंशोऽध्यायः समाप्तः ॥

अथ चतुर्विंशोऽध्यायः ।

तत्र वैवस्वतमनुवंशगान्धर्व्वमूर्च्छनाकथनं ।

सूत उवाच । निसर्गं मनुपुत्राणां विस्तरेण निबोधत ।
पृषध्रो हिंसयित्वा तु गुरोर्गोवधमभ्ययत् ॥१॥
शापाच्छूद्रत्वमापन्नश्च्यवनस्य महात्मनः ।
करूषस्य तु कारूषाः क्षत्रिया युद्धदुर्मदाः ॥२॥
सहस्रं क्षत्रियगणा विक्रान्ताः संबभूव ह ।
नाभागारिष्टपुत्रस्तु विद्वानासीद्भलन्दनः ॥३॥
भलन्दनस्य पुत्रोऽभूत प्रांशुर्नाम महाबलः ।
प्रांशोरेकोऽभवत पुत्रः प्रजानिरिति विश्रुतः ॥४॥
प्रजानेरभवत् पुत्रः खनित्रो नाम वीर्य्यवान् ।
तस्य पुत्रोऽभवत् श्रीमान् क्षुपो नाम महायशाः ॥५॥
क्षुपस्य विंशः पुत्रस्तु प्रतिमा न[1] बभूव ह ।
विंशपुत्रस्तु कल्याणो विविंशो नाम धार्म्मिकः ॥६॥
विविंशपुत्रो धर्म्मात्मा खनिनेत्रः प्रतापवान् ।
करन्धमस्तस्य पुत्रस्त्रेतायुगमुखेऽभवत् ॥७॥
करन्धमसुतश्चापि आविक्षिन्नाम वीर्य्यवान् ।
आविक्षितो व्यतिक्रामत् पितरं गुणवत्तया ॥८॥

---

(१) प्रतिमानमिति क० ख० ।

मरुत्तो[1] नाम धर्म्मात्मा चक्रवर्त्तिसमोऽनृपः ।
संवर्त्तेन द्विजश्रीतः ससृजत् सह बान्धवैः ॥८॥
विवादोऽत्र महानासीत् संवर्त्तस्य वृहस्पतेः ।
ऋद्धिं दृष्ट्वा तु यज्ञस्य क्रुद्धस्तस्य वृहस्पतिः ॥१०॥
संवर्त्तेन हृते यज्ञे चुकोप सुभृशन्तदा ।
लोकानां स हि नाशाय देवतैर्हि प्रसादितः ॥११॥
मरुत्तस्यक्रवर्त्ती स नरिष्यन्तमवाप्तवान् ।
नरिष्यन्तस्य दायादोराजा दण्डधरोदमः ॥१२॥
तस्य पुत्रस्तु विक्रान्तोराजासीद्राष्ट्रवर्द्धनः ।
सुधृती तस्य पुत्रस्तु नरः सुधृतिनः सुतः ॥१३॥
केवलस्तस्य पुत्रस्तु बन्धुमान् केवलात्मजः ।
अथ बन्धुमतः पुत्रोधर्म्मात्मा वेगवान् नृपः ॥१४॥
बुधोवेगवतः पुत्रस्तृणविन्दुर्बुधात्मजः ।
त्रेतायुगमुखे राजा तृतीये संबभूव ह ॥१५॥
कन्या तु तस्य द्रविडा माता विश्रवसोऽहि सा ।
पुत्रश्चास्य विशालोऽभूत् राजा परमधार्म्मिकः ॥१६॥
विशालस्य समुत्पन्ना विशाला नयनिर्म्मिता[2] ।
विशालस्य सुतोराजा हेमचन्द्रोमहाबलः ॥१७॥
सुचन्द्र इति विख्यातोहेमचन्द्रादनन्तरं ।
सुचन्द्रतनयोराजा धूम्राश्व इति विश्रुतः ॥१८॥

---

(१) मरुत्त इति ङ० च० ।
(२) येन निर्म्मिता इति ख० ।

धूम्राश्वतनयो विद्वान् सृञ्जयः समपद्यत ।
सृञ्जयस्य सुतः श्रीमान् सहदेवः प्रतापवान् ॥१९॥
कृशाश्वः सहदेवस्य पुत्रः परमधार्म्मिकः ।
कृशाश्वस्य महातेजाः सोमदत्तः प्रतापवान् ॥२०॥
सोमदत्तस्य राजर्षेः सुतोऽभूत् जनमेजयः ।
जनमेजयात्मजश्चैव प्रमतिः(१) नाम विश्रुतः ॥२१॥
तृणविन्दुप्रसादेन सर्व्वे वैशालका नृपाः ।
दीर्घायुषो महात्मानो वीर्य्यवन्तः सुधार्म्मिकाः ॥२२॥
शर्य्यातेर्मिथुनं त्वासीत् आनार्त्तो नाम विश्रुतः ।
पुत्रः सुकन्या कन्या च भार्य्या या च्यवनस्य तु ॥२३॥
आनार्त्तस्य(२) तु दायादो रेवो नाम्ना तु वीर्य्यवान् ।
आनार्त्तो विषयो यस्य पुरी चापि कुशस्थली ॥२४॥
रेवस्य रैवतः पुत्रः ककुद्मी नाम धार्म्मिकः ।
ज्येष्ठो भ्रातृशतस्यासीत् राज्यं प्राप्य कुशस्थलीं ॥२५॥
कन्यया सह श्रुत्वा च गान्धर्वं ब्रह्मणोऽन्तिके ।
मुहूर्त्तं देवदेवस्य मार्त्त्यं बहुयुगं विभोः ॥२६॥
आजगाम युवा चैव स्वां पुरीं यादवैर्वृतां ।
कृतां द्वारवतीं नाम बहुद्वारां मनोरमां ॥२७॥
भोजवृष्ण्यन्धकैर्गुप्तां वसुदेवपुरोगमैः ।

---

(१) प्रमातिरिति क० ज० । प्रमितिरिति ख० ।
(२) आदर्शपुस्तकेष्वेकैकस्मिन् कुत्रचिदानार्त्त क्वचिदानर्त्त इति पाठ-द्वयं दृश्यते ।

तास्तथा रैवतः श्रुत्वा यथातत्त्वमरिन्दमः ॥२८॥
कन्याञ्च बलदेवाय सुव्रतां नाम रेवतीं ।
दत्त्वा जगाम शिखरं मेरोस्तपसि संस्थितः ॥२९॥
रेमे रामश्च धर्म्मात्मा रेवत्या सहितः किल ।
तां कथां ऋषयः श्रुत्वा प्रपच्छुस्तदनन्तरं ॥३०॥
ऋषय ऊचुः । कथं बहुयुगे काले व्यतीते सूतनन्दन ।
न जरां रेवती प्राप्ता पलितञ्च कुतः प्रभो ॥३१॥
मेरुं गतस्य वा तस्य शर्य्यातेः सन्ततिः कथं ।
स्थिता पृथिव्यामद्यापि श्रोतुमिच्छामि तत्त्वतः ॥३२॥
कियन्तो वा सुरगणा गन्धर्व्वास्तच कीदृशाः ।
यच्छ्रुत्वा रैवतः कालान् मुहूर्त्तमिवमन्यते ॥३३॥
सूत उवाच । न जरा क्षुत्पिपासा वा न च मृत्युभयं ततः ।
न च रोगः प्रभवति ब्रह्मलोकगतस्य हि ॥३४॥
गान्धर्व्वं प्रति यच्चापि पृष्टन्तु मुनिसत्तमाः ।
ततोऽहं संप्रवक्ष्यामि यथातथ्येन सुव्रताः ॥३५॥
सप्तस्वरास्त्रयोग्रामा मूर्च्छनास्त्वेकविंशतिः ।
तानाश्चैकोनपञ्चाशदित्येतत्स्वरमण्डलं ॥३६॥
षड्जर्षभौ च गान्धारो मध्यमः पञ्चमस्तथा ।
धैवतश्चापि विज्ञेयस्तथा चापि निषादवान् ॥३७॥
सौविरी मध्यमग्रामोहरिणाश्या तथैव च ।
स्यात्कलोपनलोपेता चतुर्थी शुद्धमध्यमा ॥३८॥
शार्ङ्गी च पावनी चैव दृष्टाका च यथाक्रमं ।

मध्यमग्रामिकाः ख्याताः षड्जग्रामं निबोधत ॥३९॥
उत्तरमन्द्रा रजनी तथा या चोत्तरायता ।
शुद्धषड्जा तथा चैव जानीयात् सप्तमीं च तां ॥४०॥
गान्धारग्रामिकांस्त्वन्यान् कीर्त्त्यमानान् निबोधत ।
आग्निष्टोमिकमाद्यन्तु द्वितीयं वाजपेयिकं ४१॥
तृतीयं पौण्ड्रकं प्रोक्तं चतुर्थं चाश्वमेधिकं ।
पञ्चमं राजसूयञ्च षष्ठञ्च रुक्मवर्णकं (१) ॥४२॥
सप्तमं गोसवं नाम महावृष्टिकमष्टमं (२) ।
ब्रह्मदानञ्च नवमं प्राजापत्यमनन्तरं ॥४३॥
नागपक्षाश्रयं (३) विद्याद्गोतरञ्च तथैव च ।
हयक्रान्तं मृगक्रान्तं विष्णुक्रान्तं मनोहरं ॥४४॥
सूर्य्यक्रान्तं वरेण्यञ्च मत्तकोकिलवादिनं ।
सावित्रमर्द्धसावित्रं सर्व्वतोभद्रमेव च ॥४५॥
सुवर्णञ्च सुतन्द्रञ्च (४) विष्णुवैष्णुवरावुभौ ।
सागरं विजयञ्चैव सर्वभूतमनोहरं ॥४६॥
हंसं ज्येष्ठं विजानीमस्तुम्बुरुप्रियमेव च ।
मनोहरमथाव्यञ्च गन्धर्वानुगतञ्च यः ॥४७॥
अलम्बुषेष्टञ्च तथा नारदप्रिय एव च ।

(१) कुष्ठवर्णकमिति क० ङ० ञ० ।
(२) महावृत्तिकमिति ख० ।
(३) नागयक्षाश्रयमिति ख० ङ० ।
(४) सुभद्रञ्चेति ख० ङ० ।

कश्चितेभीमसेनेन नागराणां यथा प्रियः(१) ॥४८॥
त्रिकलोपनीतवितता(२) श्रीगाख्योभार्गवप्रियः(३) ।
विंशतिर्मध्यमग्रामः षड्जग्रामश्चतुर्दश(४) ॥४९॥
तथा पञ्चदशेच्छन्ति गान्धारग्रामसंस्थिताम् ।
ससौवीरा तु गान्धारी ब्रह्मणा ह्युपगीयते(५) ॥५०॥
उत्तरादिस्वरश्चैव ब्रह्मा वै देवताऽत्र च(६) ।
हरिदेशसमुत्पन्ना हरिणाख्या व्यजायत ।
मूर्च्छना हरिणाश्चैव यस्या इन्द्रोऽधिदैवतं(७) ॥५१॥
करोपनीतविततां मरुद्भिः स्वरमण्डले(८) ।

---

(१) भयाप्रियः इति ख० ।
(२) करोपनीतवितता इति पाठः समीचीनः ।
(३) अत्र ख० पुस्तके, अभिरम्यश्च शुकश्च पुण्यः पुण्यारकः स्मृतः इति पाठोवर्त्तते ।
(४) विंशत्यादिस्थाने क० ञ० पुस्तके अपाश्रियः गान्धारग्रामसंस्थिता इत्यादि खण्डितास्पष्टपाठोवर्त्तते ।
(५) ससौवीरा ब्रह्मणोत् ह्युपगीयते इति क० ञ० । ससावीरान्तसौवीरी ब्रह्मणामुपनीयते इति ख० । ब्राह्मणोह्युपगीयते इति छ० ।
(६) उत्तरादिसवश्चैव ब्रह्मा वै देवताय च इति ख० । देवतान्त च इति छ० ।
(७) मूर्च्छना हरिणा चैव इन्द्रस्याम्याधिदैवतं इति क० ञ० । हरिणाख्या-व्यजायत । मूर्च्छना हरिणा चैव इन्द्रस्याम्याधिदैवतं इति ख० । मूर्च्छना हरिणाश्चैव इन्द्रस्याम्याधिदैवतं इति छ० ।
(८) विचता मनुभिः स्वरमण्डले इति क० ञ० । विचित्रा मरुभिः स्वर-मण्डले ख० । विचता मनुद्भिः स्वरमण्डले इति छ० ।

सा कलोपगता तस्मान्माहतस्याश्च दैवतं(१) ॥५१॥
मरुद्देशमनुत्पन्ना(२) मूर्च्छना शुद्धमध्यमा ।
मध्यमोऽत्र स्वरः शुद्धो गन्धर्वश्चात्र देवता ॥५२॥
मृगैः सह सञ्चरते(३) सिद्धानां मार्गदर्शने ।
यस्मात्तस्मात् स्मृता मार्गी(४) मृगेन्द्रोऽस्याश्च दैवता ॥५४॥
सा चाश्रमसमायुक्ता(५) अनेकान् पौरवान् स्वरान् ।
मूर्च्छना योजना ज्ञेया रजसा रजनी ततः(६) ॥५५॥
ताम(७) उत्तरमन्द्रांशः षड्जदैवतकां विदुः ।
तस्मादुत्तरतान्तश्च प्रथमं स्वायतं विदुः(८) ।
तस्मादुत्तरमन्द्रायं दैवतास्य ध्रुवाध्रुवं(९) ॥५६॥
अपानादुत्तरत्वाच्च(१०) धैवतस्यान्तरायण(११) ।

(१) साकल्योपगता तस्मात्मातुस्याश्च देवता० इति क० ज० । तस्मात्मतु-तस्याश्च दैवत इति छ० ।
(२) मरुद्देशमनुत्पन्नेति ख० ।
(३) मृगैः प्रतमाश्चरन्ध इति ख० ।
(४) मार्गी इति क० ज० । मार्ग्गी इति छ० । मात्रा इति क० ।
(५) आश्रमसमायुक्ता इति छ० ।
(६) स्यात्रजसा रजनी ततः इति क० छ० ज० ।
(७) तानि इति क० ख० छ० ज० ।
(८) तस्मादुत्तरता च प्रथमं स्वायत विदुरिति क० ज० । तस्मादुत्तराश्च वै प्रथमं स्वायतमं विदुरिति ख० । तस्मादुत्तरतायाश्च प्रथमं स्वायतं विदुरिति छ० ।
(९) तमोदुत्तरमन्द्राय देवतास्या ध्रुवे ध्रुवा इति क० छ० ज० । तमोदुत्तर-मन्त्रोयं देवतास्या भवेषु चेति ख० ।
(१०) आयामदुत्तरत्वाच्च इति क० छ० । आयामादुत्तरत्वात्त इति ज० ।
(११) वैवस्य यतोऽपि चेति ख० ।

स्यादियं मूर्च्छना ह्येवं पितरः आद्यदेवताः[१] ॥५७॥
शुद्धषड्जस्वरं कृत्वा यस्मादग्नि[२] महर्षयः ।
उपतिष्ठन्ति तस्मात्तं जानीयात् शुद्धषड्जिकं[३] ॥५८॥
यः सतां मूर्च्छनां कृत्वा पञ्चमस्वरकोभवेत्[४] ।
यक्षीणां मूर्च्छना सा तु[५] याक्षिका मूर्च्छना स्मृता ॥५९॥
नागदृष्टि[६] विषा गीता[७] नोपसर्पन्ति मूर्च्छनां ।
भवन्तीव हृता ह्येते ब्रह्मणा नागदेवताः[८] ।
अहीनां मूर्च्छना ह्येषा वरुणश्चात्र देवता[९] ॥६०॥
शकुन्तकानां कृत्वा च उपमां यान्ति किन्नराः ।
उत्तमा मूर्च्छना तस्मात् पक्षिराजोऽत्र देवता ॥६१॥
गान्धारस्वरशब्देन गां धारयतेऽर्थतः ।

---

(१) स्यादियं मूर्च्छना स्वरमिति क० ज० ।
(२) शुद्धस्वरमयं कृत्वा यस्मादर्थी इति ख० ।
(३) तस्मात्तां जानीयात् शुद्धषड्जिकमिति क० ज० । शुद्धयाज्ञिकामिति ख० । तस्मात्ता रजनी स्यात् शुद्धषड्गिनीति छ० ।
(४) नियतां मूर्च्छना मच्छा यस्य मत्सरकोभवेदिति ख० । यः सभां मूर्च्छनां कृत्वा पञ्चम स्वरकोभवेदिति छ० । यः सता पूर्व्वगां कृत्वा यस्य मध्यकोभवेदिति क० ज० ।
(५) यक्षीणां मूर्च्छना श्रुत्वा इति क० ज० । यक्षीणां मूर्च्छना श्रुत्वा ख० छ० ।
(६) नागादृष्टिरिति क० ख० छ० ज० ।
(७) मथागीतमिति ख० ।
(८) भवतीव हृतोह्येते ब्रह्मणोनागदेवतामिति ख० । भवभीतहृतोह्येते ब्राह्मणा नागदेवता इति क० छ० । भयभीतहृतोह्येति ब्राह्मणा नागदेवता इति ज० ।
(९) अहीनामित्यादि वरुणश्चात्र देवता इत्यन्तं केवलं ख० पुस्तके पाठोऽस्ति ।

तस्मादिष्टकृतगान्धारी गन्धर्व्वश्चाधिदैवतं ॥६२॥
गान्धारान्तरं गत्वा यद्येयं मूर्च्छना यतः ।
तस्मादुत्तरगान्धारी वसवश्चात्र देवताः ॥६३॥
सेयं खलु महाभूता पितामहमुपस्थिता ।
षड्जेयं मूर्च्छना तस्मात् स्मृता ब्रह्मदेवता ॥६४॥
द्विस्थं चायता तेन[1] मन्द्रषष्ठा च मूर्च्छने ।
निवृत्तगुणनामानं[2] पञ्चमश्चात्र दैवतं ॥६५॥
पूर्णाः सप्तस्वरा ह्येवं[3] मूर्च्छनाः संप्रकीर्त्तिताः ।
नानासाधारणाश्चैव षड्देवानुविदस्तथेति[4] ॥६६॥

इति श्रीमहापुराणे वायुप्रोक्ते वैवस्वतमन्वन्तरगान्धर्व्वमूर्च्छना-
लक्षणकथनं नाम चतुर्विंशोऽध्यायः समाप्तः ।

---

(१) द्विस्थं पञ्चायतानेन इति ख० ङ० ।
(२) निवृत्ते गुणनामानामिति ख० ।
(३) ह्येषु इति ख० ।
(४) नानासाधारणा देवे षड्देवाश्चविदस्तथा इति क० । षड्देवाश्च विदस्तथा इति ज० ।

अथ पञ्चविंशोऽध्यायः ।

अथ गीतालङ्कारनिर्देशः ।

पूर्वाचार्यमतं बुद्धा(१) प्रवक्ष्याम्यनुपूर्वशः ।
त्रिंशतं(२) वै अलङ्कारास्तान्मे(३) निगदतः शृणु ॥१॥
अलङ्कारास्तु वक्तव्याः स्वैः स्वैर्वर्णैः प्रचेतवः(४) ।
संस्थानयोगैश्च तथा पादानां चान्ववेक्षया(५) ॥२॥
वाक्यार्थपदयोगार्थैरलङ्कारस्य पूरणं(६) ।
पदानि गीतकस्याङ्गः पुरस्तात् पृष्ठतोऽथवा(७) ॥३॥
स्थानानि त्रीणि आग्रीवादुरःकण्ठशिरस्तथा ।
एतेषु त्रिषु स्थानेषु प्रवृत्ताविधिरुत्तमः ॥४॥

---

(१) कृत्वेति छ० ।
(२) त्रिंशतामीतिपाठोयुक्तः ।
(३) स्तन्मे इति क० ख० छ० ज० ।
(४) प्रचेतवाः इति क० ज० ।
(५) संस्थानयोगैश्च तथा पादानां चान्ववेक्षया इति क० ज० । चानुवेक्षया इति ख० ।
(६) स्त्वङ्कारस्य पूरणमिति क० ख० छ० ज० ।
(७) पुरतोऽथवा इति छ० । पृष्ठतोऽयदा इति क० ज० । पृष्ठतोऽपिवा इति ग० ।

चत्वारः प्रकृतौ वर्णाः प्रविचारश्चतुर्विधः[१] ।
विकल्पमष्टधा चैव[२] देवाः षोडशधा विदुः[३] ॥५॥
स्थायी वर्णः प्रसंचारी तृतीयमवरोहणं[४] ।
आरोहणं चतुर्थन्तु वर्णं वर्णविदो विदुः[५] ॥६॥
तत्रैकः[६] संचरस्थायी मध्यरास्तचरीभवन्[७] ।
अथ रोहणवर्णानामवरोहं विनिर्दिशेत् ॥७॥
आरोहणेन चारोहवर्णं[८] वर्णविदो विदुः ।
एतेषामेव वर्णानामलङ्कारान्निबोधत ॥८॥
अलङ्कारास्तु चत्वारः स्थापनी[९] क्रमरेजिनः[१०] ।
प्रमादश्चाप्रमादश्च तेषां वक्ष्यामि लक्षणं ॥९॥
विस्वरोष्टकलाश्चैव[११] स्थानादेकान्तरं गताः ।
आवर्त्तस्याक्रमोत्पत्तौ द्वे कार्य्ये[१२] परिमाणतः[१३] ॥१०॥

(१) परिचारश्चतुर्विधः इति ख० ।
(२) विकल्पमष्टा इति क० ज० ।
(३) स्मृता इति ख० ग० ।
(४) मध्यरोहणमिति छ० ।
(५) अष्टविन्दुरिव स्मृतः इति ख० ग० ।
(६) तत्रैवः इति क० ।
(७) मध्यरात्तचरीभवदिति क० छ० ज० ।
(८) चारोहावर्णमिति क० ख० । चारोर्ध्वावर्णमिति छ० ।
(९) स्थायेना इति क० ज० । स्थापया इति ख० ।
(१०) क्रमवाजिनः इति ख० ।
(११) विश्वरोष्टकलाश्चेति छ० ज० । विश्वराष्टकलाश्चेति ख० ।
(१२) देवकार्य्ये इति क० ज० । आवर्त्तस्य क्रमेभर्त्यौ द्वे कार्य्ये इति ख० ।
आवर्त्तस्याक्रमोत्पत्तौ द्वेधार्य्ये इति छ० ।
(१३) परिमाणतः इति ख० ।

कुमारमपरं विद्याद्विसारवमनं गतं[१] ।
एष वै चाप्यपाङ्गस्तु[२] कुतारेकः कलाधिकः[३] ॥१ १॥
द्वैमस्त्वेकान्तरे[४] जातः कलामात्रान्तरे स्थितः[५] ।
तस्मिंस्तेन स्वरे वृद्धिस्तिष्ठते तद्विलक्षणा[६] ॥१ २॥
श्येनस्तु अपरोहस्तु उत्तरः परिकीर्त्तितः ।
कलाकलप्रमाणाच्च सविन्दुर्नाम[७] जायते ॥१ ३॥
विन्दुरेककला कार्य्या वर्णान्तस्थायिनी भवेत्[८] ।
विपर्य्ययस्वरोपि स्याद्यस्य दुर्घटितोऽपि न[९] ॥१ ४॥
एकान्तरा तु वाद्यन्तु षड्जतः[१०] परमः स्वरः[११] ।
आक्षेपास्कन्दनं कार्य्यं[१२] काकस्येवो ह्यपुष्कलं[१३] ॥१ ५॥

---

(१) कुमारं सपरं विद्याद्विवस्तस्वमनागतमिति ख० । विस्तरं वचनं गता इति ङ० ।
(२) एष वै वाम्यपाङ्गस्तु इति क० ज० ।
(३) एष चैवान्यपाय्यस्य कुनावेकः कलाधिप इति ख० । एष वै चाप्यपाङ्गस्तु कुनारेकः कलाधिकः इति ङ० ।
(४) श्येनस्त्वेकान्तरे इति क० ज० । स्वेन स्वेकान्तरे इति ख० ।
(५) कलामभिन्नरे स्थितः इति क० ङ० ज० ।
(६) तद्विलक्षणमिति क० ख० ङ० ज० ।
(७) सविदुरिति क० ज० । सवितुरिति ख० ।
(८) वर्णतुस्थायिनो भवेत इति क० ङ० ज० । वर्णयिस्यामि नो भवेदिति ख० ।
(९) यस्या दुर्घटितोमम इति क० ङ० ज० । यस्य दुर्जटितोऽपि न इति ख० ।
(१०) एकान्तरा स्वस्तु खड्गतः इति क० ज० । एकान्तराद्यन्तु खड्गतः इति ङ० ।
(११) खड्गन्तु परमेश्वरः इति ख० ।
(१२) आक्षेपमं स्कन्दनं कार्य्यं इति क० ङ० ज० ।
(१३) काकस्येयच पुष्कलमिति ख० ङ० । काकस्योपचपुष्कलमिति ज० । काकस्योङ्कपुष्कलमिति ख० ।

मन्त्रारे तौ तु संयोगौ(१) कार्यं वा कारणं तथा ।
आक्षिप्रमवरोह्यापि(२) प्रोक्तमध्यन्तथैव च(३) ॥१६॥
द्वादशस्तु कलास्थान(४)मेकाक्षरगतन्ततः ।
प्रोक्षितमलङ्कारमेवंस्वरसमन्वितं(५) ॥१७॥
स्वरसंक्रामकाश्चैव(६) ततः प्रोक्तन्तु पुस्तकं(७) ।
प्रक्षिप्तमेव कलया पादामीतरयोभवेत्(८) ॥१८॥
द्विकलं वा यथा भूतं यत्तत् प्लावितमुच्यते(९) ।
उदात्तादिस्वराकृष्टा(१०) तथा चाष्टस्वरान्तरं(११) ॥१९॥
यस्तु स्यादवरोहेत्वा(१२) तारतोमन्द्रतोऽपि वा ।
एकाक्षरहिता ह्येते तस्येव स्वरमन्ततः(१३) ॥२०॥

---

(१) सवार्थौ इति क० । स वर्ण्यौ इति ज० । समन्तधौ तु संयानौ इति ख०।
(२) आक्षिप्रवानाद्यापीति क० ज० ।
(३) पोक्तमध्यन्तथैव चेति ख० ।
(४) द्वादशापञ्चकलास्थानमिति ख० ।
(५) प्रोक्षितस्य मन्त्रारमेवं स्वरसन्निभमिति ख० ।
(६) स्वरासंक्रामकाश्चेति ख० ।
(७) अत्र क० ज० पुस्तकेषु अर्थशून्यवाक्यानि विद्यन्ते
(८) पादामान्तरयोभवेदिति ख० ङ० ।
(९) यत्तल्लावितमुच्यते इति ख० ङ० ।
(१०) विश्ववाक्य इति ख० ।
(११) चाष्टस्वरात् परमिति क० ज० । चाष्टस्वरात पद्ममिति ङ० ।
(१२) वायः स्यादवरोहोधा इति क० ज० । वायः स्यदेवरोहोवा इति ङ० ।
वायथ्यां वयसोहोमा इति ख० ।
(१३) स्वरसन्तत इति क० ङ० ज० । सर्व्वे ह्येते वसुवसन्ततः । इति ख०।

सन्धिप्रच्छेदनोनाम(१) चतुष्कलगणः स्मृतः ।
अलङ्कारा भवन्त्येते त्रिंशद्वै प्रकीर्त्तिताः ।
वर्णस्थानप्रयोगेण कलामात्राप्रमाणतः ॥२१॥
संस्थानञ्च प्रमाणञ्च विकारो लक्षणन्तथा ।
चतुर्विधमिदं ज्ञेय(२)मलङ्कारप्रयोजनं ॥२२॥
यथात्मनो ह्यलङ्कारो(३)विपर्यस्तोऽतिगर्हितः ।
वर्णमेवाप्यलंकर्त्तुं निषमं ह्यात्मसम्भवात्(४) ॥२३॥
नानाभरणसंयोगाद्यथा नार्या विभूषणं ।
वर्णस्य चैवालङ्कारो(५) विपर्यस्तोऽतिगर्हितः ॥२४॥
न पादे कुण्डले दृष्टे न कण्ठे रसना यथा ।
एवमेव ह्यलङ्कारो विपर्यस्तो विगर्हितः ॥२५॥
क्रियमाणोऽप्यलङ्कारो(६) रागं यस्यैव दर्शयेत् ।
यथोद्दिष्टस्य मार्गस्य कर्त्तव्यस्य विधीयते ॥२६॥
लक्षणं पर्य्यवस्यापि वर्णिकाभिः प्रवर्त्तनं ।
यथातथ्येन वक्ष्यामि मार्षाङ्कवमुखाङ्कवे(७) ॥२७॥
चर्याविंशत्यशीतिस्तु तेषामेतद्विपर्य्ययः ।

(१) सन्धिप्रच्छेदजोनाम इति क० ज० । सन्धिप्रच्छेदनोनाम इति ख० ।
(२) चतुर्विधञ्च संस्थानमिति ख० ।
(३) वर्णस्य चैवालङ्कारो इति ख० ।
(४) ह्यात्मसम्भव इतिपाठोयुक्तः ।
(५) अत्र विन्यस्तोऽतिमनोहर इतिपाठोवक्तुं समुचितः ।
(६) क्रियमाणेऽप्यलङ्कारे इतिपाठोऽन्वितार्थो दृश्यते ।
(७) मार्षाङ्कवषाडुङ्कवे इति ख० ।

षड्जपञ्चोऽपि तस्यादौ मध्योदीनस्वरोभवेत् ॥२८॥
षड्जमध्यमयोश्चैव ग्रामयोः पर्य्ययस्तथा ।
मानोयान्तरमन्द्रस्य[1] षड्वोऽन्त्राविकस्य[2] च ॥२९॥
स्वराणांप्रत्ययश्चैव[3] सर्व्वेषां प्रत्ययः स्मृतः ।
अनुगम्य वह्निर्गीतं[4] विज्ञातं पञ्चदैवतं ॥३०॥
गारूपाणां[5] पुरस्तात्तु मध्यमांशस्तु पर्य्ययः ।
सर्वानिभागागानानां त्वावर्त्त[6]मार्गमस्थितः ॥३१॥
अनुषङ्गं मयोद्दिष्टं स्वसारस्य स्वरान्तरं ।
पर्य्ययः संप्रवर्त्तेत सप्तस्वरपदक्रमं ॥३२॥
गान्धारांशश्च गीयन्ते चत्वारि मद्रकानि च[7] ।
पञ्चमोमध्यमश्चैव धैवते तु[8] निषादजैः ।
षड्जर्षभेषु[9] जानीयामद्रकेष्वेव सान्तरे ॥३३॥

(१) न्यासरमन्द्रस्येतिपाठः समीचीनः ।
(२) अत्र क० ख० ङ० ञ० पुस्तके अर्थशून्यपाठत्रयं वर्त्तते । यथा, षड्वौ- न्त्रावकस्य च, षोड्वोऽर्थविकस्य च षड्वोऽन्त्रावकस्य च । षड्वोऽन्त्राव- कस्य च इत्यत्र षड्वोऽन्त्रावकस्य चेतिपाठः कथञ्चित् सङ्गतोभवेत् ।
(३) स्वराणां प्रत्ययश्चेतिपाठः समीचीनः ।
(४) वह्निर्गीतामिति ख० ।
(५) अत्र नगौनामिति क० ङ० । नगौनामित्यत्र नागानामितिपाठः सम्भवति ।
(६) अत्र क० ञ० पुस्तके त्वानर्त्तो । ङ०पुस्तके त्वावर्त्तेऽथसम्बद्धपाठो- वर्त्तते ।
(७) अत्र क० ख० ङ० ञ० पुस्तके चत्वारो इतिभ्रमात्मकपाठोऽस्ति ।
(८) धैवतस्तु इतिपाठः सङ्गतः ।
(९) क० ख० ग० ङ० ञ० पुस्तकेषु षड्वर्षभश्चेति अर्थविहीनपाठोऽस्ति ।

द्वे चापरान्तिके विद्यात् द्वयमुल्लाप्यकस्य तु[1] ।
प्राकृते वैणवैश्चैव गान्धारांशे प्रयुज्यते ॥३४॥
पदस्य तु त्रयं रूपं[2] सप्तरूपन्तु कौशिकं ।
गान्धारांशेन कार्त्स्न्येन पर्ययस्य विधिः स्मृतः ।
एवञ्चैव क्रमोद्दिष्टोमध्यमांशस्य मध्यमः ॥३५॥
यानि गीतानि प्रोक्तानि रूपेण तु विशेषतः ।
तत्तु सप्तस्वरं कार्य्यं सप्तरूपञ्च कौशिकं ॥३६॥
अङ्गदर्शनमित्याहुर्मात्रे द्वे सप्तके तथा[3] ।
द्वितीयभावाचरण[4] मात्रा नाभिप्रतिष्ठिता ॥३७॥
उत्तरे च प्रकृत्येवं मात्रा तन्नीयते तथा ।
छन्नारः[5] पिण्डकोयत्र मात्रायां नातिवर्त्तते[6] ॥३८॥
पादैनैकेन मात्रायां पादानामनिवारिणा[7] ।
संख्यायाश्चोपहननं तत्र यान[8]मिति स्मृतं ॥३९॥

---

(१) अत्र क० ख० ङ० ञ० एषु चतुर्षु पुस्तकेषु अर्थशून्यपाठत्रयं वर्त्तते । यथा, द्वेषावरान्तिके विद्याद्वयमुल्लाप्यकस्य तु, द्वे चापरान्तिके विद्या-द्वयसुल्लाप्यकस्य तु, वमसर्गाष्टकस्य तु ।

(२) पदस्वरूपं रूपन्तु इति ख० ङ० ।

(३) सप्तके तथेति ख० ङ० ।

(४) अत्र क० ख० ङ० ञ० पुस्तकेषु त्रयोऽर्थरहितपाठाः सन्ति । यथा, द्वितीयभावायना, द्वितीयभाषा चवना, द्वितीयभावा यदि ना ।

(५) छन्नारो इति क० ङ० ञ० ।

(६) न निवर्त्तते इति ख० ।

(७) पादानामभिधारका इति ख० । पादानामतिवीरका इतिपाठः समीचीनः ।

(८) तत्र यातमिति ख० ।

द्वितीयं पादभक्तञ्च[1] षष्ठेनाभिप्रतिष्ठितं ।
पूर्व्वमष्टवतीये तु द्वितीयञ्चापरान्तके[2] ॥४०॥
अर्द्धेन पादमात्रस्य[3] पादभागाश्च पञ्चके[4] ।
पादभागं सपादं तु प्रकृत्यामपि संस्थितं ॥४१॥
चतुर्थमुत्तरे चैव मद्रवत्यां च मद्रके ।
मद्रके दक्षिणस्यापि यथोक्ता वर्त्तते कला ॥४२॥
पूर्व्वमेवानुयोगस्तु द्वितीया वृद्धिरिष्यते ।
पादौ चाहरणश्चास्मिन पादं नात्र विधीयते ॥४३॥
एकत्वमुपयोगस्य[5] द्वयोर्वृद्धि ॥[?]सोत्तम ।
अनेकसमवायस्तु पताकाहरिणं स्मृतं ॥४४॥
निगूणाश्चैव वर्णानां वर्णा वृत्ता च दक्षिणा ।
अष्टौ तु समवायास्ते सौवीरा मूर्च्छना तथा ।
कुशान्यमुत्तरः[6] सत्यं सप्तमन्त्वक्षरं तु यः[7] ॥४५॥

इति श्रीमहापुराणे वायुप्रोक्ते गीतालङ्कारनिर्द्देशोनाम
पञ्चविंशोऽध्यायः समाप्तः ॥

---

(१) पादभागश्च इति ख० ग० ।
(२) चापरान्तके इति ख० चापरान्तिकमिति ग० । चापरान्तिके इति छ० ।
(३) पादसप्तमस्येति क० छ० ज० ।
(४) पादभागाय चम्पके इति ख० ।
(५) एकत्वमभ्युपयोगस्येति क० ज० । एकत्वमुत्तयोगस्येति ख० ग० ।
(६) कशान्यामुत्तर इति छ० ज० ।
(७) पूर्ब्बं सप्तसुवर्णसः इति ख० ग० ।

अथ षड्विंशोऽध्यायः ।

वैवस्वतमनुवंशवर्णनं ।

(1)सूत उवाच । ककुद्मिनस्तु तं लोकं रैवतस्य गतस्य ह ।
हता: पुण्यजनै: सर्व्वा राक्षसै: सा कुशस्थली ॥१॥
तद्वै भ्रातृशतं तस्य धार्म्मिकस्य महात्मन: ।
निबध्यमाना(2) रक्षोभिर्दिश: संप्राद्रवन् भयात् ॥२॥
तेषान्तु ते भयाक्रान्ता: क्षत्रियास्तत्र तत्र हि ।
अन्ववायस्तु(3) सुमहान् महांस्तत्र द्विजोत्तमा: ॥३॥
प्रयता(4) इतिविख्याता दिक्षु सर्व्वासु धार्म्मिका: ।
धृष्टस्य धार्ष्टकं क्षत्रं रणधृष्टं(5) बभूव ह ।४॥
त्रिसाहस्रन्तु सगणं क्षत्रियाणां महात्मनां ।
नभगस्य च दायादोनाभागोनाम वीर्य्यवान् ॥५॥
अम्बरीषस्तु नाभागिर्विरूपस्तस्य चात्मज: ।
पृषदश्वोविरूपस्य तस्य पुत्रोरथीतर:(6) ॥६॥

---

(१) सूत उवाच इत्यतः प्राक् ख० ग० पुस्तके एतच्छ्लोकार्द्धमस्ति । विश्वख्यातसुतं तस्य धार्म्मिकस्य महात्मन: । किन्तु पूर्व्वापरसङ्गतिविरोधादपपाठ एव ।
(२) ते बध्यमाना इति घ० ङ० छ० ।
(३) अनुवादस्तु इति ख० ग० ।
(४) आयाता इति ङ० घ० ।
(५) क्षेत्रं वाक्ष्दृष्टमिति ख० ग० ।
(६) रथोत्तर इति क० ज० । रथीवर: इति ख० ।

एते क्षत्रप्रसूता वै पुनश्चाङ्गिरसः स्मृताः ।
रथीतराणां प्रवराः क्षात्रोपेता द्विजातयः ॥७॥
क्षुवतस्तु मनोः पूर्व्वमिक्ष्वाकुरभिनिःसृतः ।
तस्य पुत्रशतं त्वासीत् इक्ष्वाकोर्भूरिदक्षिणं ॥८॥
तेषां ज्येष्ठो(१) विकुक्षिश्च नेमिर्दण्डश्च ते त्रयः ।
शकुनिप्रमुखास्तस्य पुत्राः पञ्चाशत(२)स्तु ते(३) ॥९॥
उत्तरापथदेशस्य रक्षितारो महीक्षितः ।
चत्वारिंशत्तथाष्टौ च दक्षिणायाश्च ते दिशि ॥१०॥
विंशतिप्रमुखास्ते तु दक्षिणापथरक्षिणः ।
इक्ष्वाकुस्तु विकुक्षिं वै अष्टकायामथादिशत् ॥११॥
राजोवाच । मांसमानय श्राद्धीयं मृगान् हत्वा महाबल ।
श्राद्धमद्य नु कर्त्तव्यमष्टकायां न संशयः ॥१२॥
स गतस्तु मृगव्यां वै वचनात्तस्य धीमतः ।
मृगान् सहस्रशो हत्वा परिश्रान्तश्च वीर्य्यवान् ।
भक्षयच्छशकन्तत्र विकुक्षिर्मृगयाद्गतः ॥१३॥
आगते स विकुक्षौ तु समांसे सहसैनिके ।

(१) ज्येष्ठो इति ग० घ० ङ० । स्वेदो इति क० । स्वेद्यो इति क० ।
(२) पञ्चाशत बहुवचनमार्षं । पञ्चाशत इत्यत्र पञ्चाशतः इति पाठः ङ० च० पुस्तके वर्त्तते ।
(३) विकुक्षिश्चेत्यादि पञ्चाशतस्तु ते इत्यन्तपाठस्य विनिमये ख० ग० पुस्तके अयं पाठो वर्त्तते । यथा, विकुक्षी च तथैव च पुनः पुनः । शकुनिः प्रमुखाश्चैव पुत्रास्तु अगतास्तु वै । इत्ययपाठएव ।

वसिष्ठश्चोदयामास मांसं प्रोक्ष्यतामिति[1] ॥१४॥
तथेति चोदितो राज्ञा विधिवत्समुपस्थितः ।
स दृष्ट्वोपहतं मांसं क्रुद्धो राजानमब्रवीत् ॥१५॥
क्षुद्रेणोपहतं मांसं पुत्रेण तव पार्थिव ।
शशभक्षादभोज्यं वै तव मांसं महाद्युते ॥१६॥
शशो दुरात्मना पूर्वमरण्ये भक्षितोऽनघ ।
तेन मांसमिदं दुष्टं पितॄणां नृपसत्तम ॥१७॥
इक्ष्वाकुस्तु ततः क्रुद्धो विकुक्षिमिदमब्रवीत् ।
पितृकर्म्मणि निर्द्दिष्टो मया त्वं मृगयाकृतः ।
शशं भक्षयसेऽरण्ये निर्घृणः पूर्व्वमद्य नु ॥१८॥
तस्मात्परित्यजामि त्वां गच्छ त्वं स्वेन कर्म्मणा ।
एवमिक्ष्वाकुना त्यक्तो वसिष्ठवचनात् सुतः ॥१९॥
इक्ष्वाकौ संस्थिते तस्मिन् शशी स[2] पृथिवीमिमां ।
प्राप्तः परमधर्म्मात्मा स चायोध्याधिपोऽभवत् ॥२०॥
तदाकरोत्स राज्यं वै वसिष्ठपरिनोदितः[3] ।
ततस्तेनैव सा पूर्णा राज्यावस्था महीपतेः ॥२१॥
कालेन गतवांस्तत्र स च नूनतराकृतिं ।
ज्ञात्वैवमेतदाख्यानं नाविधिर्भक्षयेत्तु[4] वै ॥२२॥

---

(१) प्रोक्षीयतामिति, ख० ग० ङ० च० पुस्तकेषु पाठोवर्त्तते ।
(२) शशास इति ख० ग० ङ० च० छ० ।
(३) वसिष्ठपरिचोदितः इति ख० ।
(४) भक्षये नु इति च० ङ० ।

गां स भक्षयितासुत्र यस्य मांसमिहाग्रतः।
एतन्मांसस्य मांसत्वं प्रवदन्ति मनीषिणः॥२३॥
शशादस्य तु दायादः ककुत्स्थो नाम वीर्य्यवान्।
इन्द्रस्य वृषभूतस्य ककुत्स्थो जायते पुरा॥२४॥
पूर्व्वमाडीवके(१) युद्धे ककुत्स्थ(२)स्तेन स स्मृतः।
अनेनास्तु ककुत्स्थस्य पृथुरामेन सः(३) स्मृतः॥२५॥
वृषदश्वः(४) पृथोः पुत्त्रस्तस्मादन्ध्रस्तु वीर्यवान्।
आन्ध्रस्तु यवनाश्वस्तु श्रावस्तस्तस्य चात्मजः॥२६॥
जज्ञे श्रावस्तको राजा श्रावस्ती येन निर्मिता।
श्रावस्तस्य तु दायादो बृहदश्वो महायशाः॥२७॥
बृहदश्वसुतश्चापि कुवलाश्व इति श्रुतिः।
यः स धुन्धुवधाद्राजा धुन्धुमारत्वमागतः॥२८॥
ऋषय ऊचुः। धुन्धुवधं महाप्राज्ञ श्रोतुमिच्छामि विस्तरात्।
यदर्थं कुवलाश्वः स धुन्धुमारत्वमागतः॥२९॥
सूत उवाच। बृहदश्वस्य पुत्राणां सहस्राण्येकविंशतिः।
सर्वे विद्यासु निष्णाता बलवन्तो दुरासदाः॥३०॥

(१) पूर्व्वं माडीवके इति क०।
(२) ककुत्स्थ इति पाठः आदर्शपुस्तकमात्रेऽस्ति।
(३) पृथुनामेन च इति ख०। एतच्छ्लोकार्द्धं ग० पुस्तके नास्ति। पृथुरोमेन-सः इति ङ०। पृथुरोमेन स इति छ०। एते यावन्तः पाठा लिपिकर-प्रमादजनिताः। अत्रायं पाठः सम्भाव्यते। अनेनैव ककुत्स्थेन जातः पुत्रः पृथुः स्मृतः।
(४) वृषदश्वः इति क० छ०।

बभूवुर्धार्म्मिकाः सर्वे यज्वानो भूरिदक्षिणाः ।
कुवलाश्वं महावीर्यं शूरमुत्तमधार्म्मिकम् ॥ ३१॥
बृहदश्वोऽभ्यषिञ्चत्तं तस्मिन् राष्ट्रे नराधिपः ।
पुत्रसङ्क्रामितश्रीस्तु वनं राजा विवेश ह ॥ ३२॥
बृहदश्वं महाराजं शूरमुत्तमधार्म्मिकं ।
प्रयातं तमुतङ्कस्तु ब्रह्मर्षिः प्रत्यवारयत् ॥ ३३॥
उतङ्क उवाच । भवतो(१) रक्षणं(२) कार्य्यं तत्तावत् कर्तुमर्हसि ।
निरुद्विग्नस्तपः कर्तुं(३) न हि शक्नोमि पार्थिव ॥ ३४॥
ममाश्रमसमीपेषु समेषु मरुधन्वसु(४) ।
समुद्रो वालुकापूर्णस्तत्र तिष्ठति भूपते(५) ॥ ३५॥
देवतानामवध्यस्तु महाकायो महाबलः ।
अन्तर्भूमिगतस्तत्र वालुकान्तर्हितो महान् ॥ ३६॥
समनोस्तनयः क्रूरो धुन्धुर्नाम सुदारुणः ।
शेते(६) लोकविनाशाय तप आस्थाय दारुणं ॥ ३७॥
संवत्सरस्य पर्य्यन्ते स निश्वासं प्रमुञ्चति(७) ।

(१) भवता इति क० ङ० च० छ० ज० । एतत्पाठो न समीचीनः ।
(२) इवैतावत्तरमिति ख० ग० । इति तु भ्रान्तानां पाठः ।
(३) तपश्चर्तुमिति क० ङ० च० ज० ।
(४) परितस्तु वै इति छ० ज० ।
(५) उज्जानक इति श्रुतिः इति ङ० च० ।
(६) शते इति ङ० च० । अयं पाठो लेखकप्रमादजनित एव ।
(७) समनोस्तनय इत्यादि स निश्वासं प्रमुञ्चति इत्यन्तपाठः क० छ० ज० पुस्तकेषु न विद्यते ।

यदा तदा मही तत्र चलति स्म सकानना(१) ॥ ३८ ॥
तस्य निश्वासवातेन रज उद्धूयते महत् ।
आदित्यपथमावृत्य सप्ताहं भूमिकंपनं ॥ ३९ ॥
सविस्फुलिङ्गं सज्वालं सधूममतिदारुणं ।
तेन राजन्न शक्नोमि तस्मिन् स्थातुं स्व आश्रमे ॥ ४० ॥
तं वारय(२) महाबाहो लोकानां हितकाम्यया ।
तेजस्ते समहाविष्णुस्तेजमाप्याययिष्यति ॥ ४१ ॥
लोकाः स्वस्था भवन्त्वद्य तस्मिन् विनिहतेऽसुरे ।
त्वं हि तस्य वधायाद्य समर्थः पृथिवीपते ॥ ४२ ॥
विष्णुना च वरोदत्तोमम पूर्व्वं ततोनघ ।
न हि धुन्धुर्महावीर्य्यस्तेजसाल्पेन शक्यते ॥ ४३ ॥
निर्द्दग्धुं पृथिवीपाल अपि वर्षशतैरिह ।
वीर्य्यं हि सुमहत्तस्य देवैरपि दुरासदं ॥ ४४ ॥
एवमुक्तस्तु राजर्षिरुत्तङ्केन महात्मना ।
कुवलाश्वं सुतं प्रादात्तस्मिन् धुन्धुनिवारणे ॥ ४५ ॥
राजा संन्यस्तशस्त्रोऽहमयन्तु तनयो मम ।
भविष्यति द्विजश्रेष्ठ धुन्धुमारो न संशयः ॥ ४६ ॥
स तं व्यादिश्य तनयं धुन्धुमारणमुद्यतं(३) ।

(१) समन्ततस्समर्णपिषु इत्यादि चलति स्म सकानना इत्यन्तपाठः ख० ग० पुस्तकयोर्नास्ति ।
(२) तद्वारय इति क० ज० ।
(३) धुन्धुमारत्व उद्यतं इतिपाठोऽत्र सङ्गतार्थः ।

जगाम पर्व्वतायैव तपसे संशितव्रतः ॥४७॥
कुवलाश्वस्तु धर्म्मात्मा पितुर्वचनमास्थितः(१) ।
सहस्रैरेकविंशत्या पुत्राणां सह पार्थिवः ।
प्रायादुत्तङ्कसहितो धुन्धोस्तस्य निवारणे ॥४८॥
तमाविशत्ततो विष्णुर्भगवान् स्वेन तेजसा ।
उत्तङ्कस्य नियोगात्तु लोकानां हितकाम्यया ॥४९॥
तस्मिन् प्रयाते दुर्द्धर्षे दिवि शब्दो महानभूत् ।
अद्यप्रभृत्येष नृपो धुन्धुमारो भविष्यति ॥५०॥
दिव्यैः पुष्पैश्च तं देवाः समसंमत अद्भुत(२) ।
स गत्वा पुरुषव्याघ्रस्तनयैः सह वीर्य्यवान् ॥५१॥
समुद्रं खनयामास वालुकार्णवमव्ययं ।
नारायणेन राजर्षिस्तेजसाप्यायितो हि स(३) ।
बभूवातिबलो भूय उत्तङ्कस्य वशे स्थितः ॥५३॥
तस्य पुत्रैः खनद्भिश्च वालुकान्तर्हितस्तदा(४) ।
धुन्धुरासादितस्तत्र दिशमाश्रित्य पश्चिमां ॥५४॥
मुखजेनाग्निना क्रुद्धो लोकानुद्वर्त्तयन्निव ।

---

(१) मास्थित इति ख० ।
(२) समं मास तदद्भुतमिति ङ० च० । समं मासस्तु तद्भुतमिति क० छ० ज० । सगन्धर्व्वास्तदद्भुतमिति ख० ग० । एते सावद्याः पाठा लेखकप्रमादोत्पन्नाः ।
(३) हि स इत्यत्र हि च इति भ्रमात्मकपाठो ङ० च० छ० पुस्तकेषु दृश्यते ।
(४) नारायणेन राजर्षिरित्यादि वालुकान्तर्हितस्तदेति सार्द्धश्लोको ङ० च० छ० अतिरिक्तादर्शपुस्तकेषु न दृश्यते ।

वारि शुश्राव योगेन महोदधिरिवोदये ॥५५॥
सोमस्य सोमपश्रेष्ठ धारोर्मिकलिलो महान् ।
तस्य पुत्रास्तु निर्दग्धास्त्रिभिरूनास्तु राक्षसाः ॥५६॥
ततः स राजा निबलो धुन्धुबन्धुनिबर्हणः ।
तस्य वारिमयं वेगमपिबत स नराधिपः ॥५७॥
योगी योगेन वह्निं वा शमयामास वारिणा(१) ।
निरस्य तं महाकायं बलेनोदकराक्षसं ॥५८॥
उत्तङ्कं दर्शयामास कृतकर्म्मा नराधिपः ।
उत्तङ्कस्तु वरं प्रादात्तस्मै राज्ञे महात्मने ॥५९॥
अदात्तस्याक्षयं वित्तं शत्रुभिश्चाप्यधृष्यतां ।
धर्म्मे रतिञ्च सततं स्वर्गे वासं तथाक्षयं ।
पुत्राणां चाक्षयाँल्लोकान् स्वर्गे ये(२) रक्षसा हताः ॥६०॥
तस्य पुत्रास्त्रयः शिष्टा दृढाश्वो(३) ज्येष्ठ उच्यते ।
भद्राश्वः कपिलाश्वश्च कनीयांसौ तु तौ स्मृतौ ॥६१॥
धौन्धुमारिर्दृढाश्वस्तु(४) हर्य्यश्वस्तस्य चात्मजः ।
हर्य्यश्वस्य निकुम्भोऽभूत क्षत्रधर्म्मरतः सदा ॥६२॥

---

(१) अत्र क० ख० छ० ञ० पुस्तकेषु भ्रान्तिप्रमादपाठोवर्त्तते । यथा, धारकाः, धारिणा । ग० ङ० च० पुस्तकेषु योगी योगेनेतिश्लोकार्द्धस्य सद्भावोनास्ति ।
(२) ते इति च० छ० । ङ० पुस्तके स्वर्गेन इति अर्थशून्यपाठोवर्त्तते । क० ग० ञ० पुस्तकेषु पुत्राणामितिश्लोकार्द्धस्याभावोदृश्यते ।
(३) दृढाश्वो इति क० ञ० ।
(४) ख० ग० पुस्तकयोः अन्यथा विदृढश्चेति अर्थरहितपाठोवर्त्तते ।

संहताश्वो निकुम्भस्य सुतो रणविशारदः(१) ।
कृशाश्वश्चाक्षयाश्वश्च(२) संहताश्वसुतावुभौ ॥६३॥
तस्य पत्नी हैमवती सती मतिदृषद्वती(३) ।
विख्याता त्रिषु लोकेषु पुत्रस्तस्याः प्रसेनजित् ॥६४॥
युवनाश्वः सुतस्तस्य त्रिषु लोकेष्वतिद्युतिः ।
अत्यन्तधार्मिको(४) गौरी तस्य पत्नी पतिव्रता ॥६५॥
अभिशप्ता तु सा भर्त्रा नदी सा बाहुदा कृता ।
तस्यास्तु गौरिकः पुत्रश्चक्रवर्त्ती बभूव ह ॥६६॥
मान्धाता यौवनाश्वो वै त्रैलोक्यविजयी नृपः ।
अत्राप्युदाहरन्तीमौ श्लोकौ पौराणिका द्विजाः ॥६७॥
यावत् सूर्य उदयति यावच्च प्रतितिष्ठति ।
सर्वं तत् यौवनाश्वस्य मान्धातुः क्षेत्रमुच्यते ॥६८॥
अत्राप्युदाहरन्तीमं श्लोकं वंशविदो जनाः ।
यौवनाश्वं महात्मानं यज्वानममितौजसं ।
मान्धाता तु तनुर्विष्णोः पुराणज्ञाः प्रचक्षते ॥६९॥
तस्य चैत्ररथी भार्य्या शशविन्दोः सुताभवत् ।

(१) क० ङ० च० छ० ज० पुस्तकेषु भ्रान्तियुक्तपाठोऽस्ति । यथा, श्रोतोरणविशारद, श्रुतोरणविशारद. । कृतास्त्रविशारदः इति ख० ।
(२) चाद्याश्वश्चेति क० ङ० घ० छ० ज० ।
(३) माता दृषद्वतीति क० छ० ज० । सता माता दृढ़व्रता इति ख० । सतामतिदृषद्वतीति ङ० । माता इत्यत्र मान्या इति पाठो-युक्तः ।
(४) अत्यन्तधार्म्मिका इति ख० । अभिमानात्मजा इति छ० घ० ।

साध्वी बिन्दुमती नाम रूपेणाप्रतिमा भुवि ॥७०॥
पतिव्रता च ज्येष्ठा[1] च भ्रातॄणामयुतस्य सा ।
तस्यामुत्पादयामास मान्धाता त्रीन् सुतान् प्रभुः ॥७१॥
पुरुकुत्समम्बरीषं मुचुकुन्दञ्च[2] विश्रुतं ।
अम्बरीषस्य दायादो युवनाश्वोऽपरः स्मृतः ॥७२॥
हरितो युवनाश्वस्य[3] हारिताः शूरयः[4] स्मृताः ।
एते ह्यङ्गिरसः पुत्राः क्षत्रोपेता[5] द्विजातयः ॥७३॥
पुरुकुत्सस्य दायादस्त्रसदस्यु[6] र्महायशाः ।
नर्मदायां समुत्पन्नः सम्भूतस्तस्य चात्मजः ॥७४॥
सम्भूतस्यात्मजः पुत्रो ह्यनरण्यः प्रतापवान् ।
रावणो निहतो[7] येन त्रिलोकीविजये[8] पुरा ॥७५॥
त्रसदश्वोऽनरण्यस्य हर्य्यश्वस्तस्य चात्मजः ।
हर्य्यश्वात्तु दृषद्वत्यां जज्ञे वसुमतो नृपः ॥७६॥
तस्य पुत्रोऽभवद्राजा त्रिधन्वा नाम धार्म्मिकः ।

(१) श्रेष्ठा इति छ० ।
(२) मुचकुन्दश्चेति ङ० ।
(३) हरितो युवनाश्वस्य इत्यादिसार्द्धैकश्लोकः क० छ० ज० पुस्तकेषु न विद्यते ।
(४) भूरय इति ङ० च० । नारीताः शूरयः ख० ग० । एतावर्थशून्यपाठावुपलभ्येते ।
(५) क्षत्रोपेता इति ख० ङ० च० । किन्तु न सम्यक् ।
(६) स हदास्युरिति ख० ।
(७) न हतो इति ङ० च० । निर्ज्जितो इति ख० ।
(८) त्रिलोकविजये क० ख० ङ० च० छ० ज० ।

आसीत् वैधन्वनस्यापि विद्वांस्त्रय्यारुणप्रभुः[१] ॥७७॥
तस्य सत्यव्रतोनाम कुमारोऽभून्महाबलः ।
तेन भार्या विदर्भस्य हृता हत्वा दिवौकसान् ॥७८॥
पाणिग्रहणमन्त्रेषु[२] निष्ठांसम्प्रापितेष्विव ।
विष्णुवृद्धः सुतस्तस्य विष्णुवृद्धायतः सुतः[३] ।
एते ह्याङ्गिरसः पुत्राः क्षात्रोपेताः समाश्रिताः ॥७९॥
कामाद्दम्भाच्च मोहाच्च सङ्कर्षणबलेन च[४] ।
भाविनोऽर्थस्य च बलात् तत्कृतं तेन धीमता ॥८०॥
तमधर्म्मेण संयुक्तं पिता त्रय्यारुणोऽत्यजत्[५] ।
अपध्वंसेति बहुशोऽवदत् क्रोधसमन्वितः ॥८१॥
पितरं सोऽब्रवीदेकः क्व गच्छामीति वै सुतः ।
पिता चैनमथोवाच श्वपाकैः सह वर्त्तय ॥८२॥
नाहं पुत्रेण पुत्रार्थी त्वयाद्य कुलपांसन ।
इत्युक्तः स निराक्रामन्नगराद्वचनाद्विभोः ॥८०॥

(१) निरञ्जास्त्रय्यः रुणप्रभुरिति क० । आसीत् सात्वधन्वस्यापि विद्वत्त्रय्या-रुण प्रभुरिति ख० । ग० पुस्तके एतच्छ्लोकार्द्धस्य सद्भावो नास्ति । विद्वांस्त्रय्यारुणप्रभुरिति ङ० च० । विद्वान्त्रय्यारुणप्रभुरिति छ० । विरञ्जास्त्रय्यः रुणप्रभुरिति ज० । एते भ्रान्तानां पाठाः ।
(२) पाणिग्रहणमन्त्रेष्विति श्लोकार्द्धस्य पूर्व्वापरसङ्गतिविरहात् अत्र श्लोकः श्लोकार्द्धं वा पतितत्वेनोपलभ्यते ।
(३) विष्णुवृद्धोयतोऽभवदितिपाठः समीचीनः ।
(४) संहर्षेण बलेन च इति ख० । संहर्षणबलेन वा इति ङ० च० छ० । सङ्कर्षणबलेन च इति ज० । आदिमौ द्वावपपाठौ चान्तिमोऽत्रम-संयुक्तः ।
(५) त्रय्युणोत्यजत् इति क० । त्रय्यारुणोऽभवदिति ख० ङ० च० । त्रय-रुणोत्यजत् इति छ० ज० । एते भ्रान्तिमतां पाठाः ।

न चैनं धारयाम वसिष्ठो भगवानृषिः ।
स तु सत्यव्रतो धीमान् श्वपाकावसथान्तिके ।
पित्रा मुक्तोऽवसद्वीरः पिता चास्य वनं ययौ ॥८४॥
तस्मिंस्तु विषये तस्य नावर्षत् पाकशासनः ।
समा द्वादश संपूर्णास्तेनाधर्म्मेण वै तदा ॥८५॥
दारांस्तु तस्य विषये विश्वामित्रो महातपाः ।
सन्न्यस्य सागरानूपे चचार विपुलं तपः ॥८६॥
तस्य पत्नी गले बद्ध्वा मध्यमं पुत्रमौरसं ।
शिखया[१] भरणार्थाय व्यक्रीणाद्गोशतेन[२] वै ॥८७॥
तं तु बद्धं गले दृष्ट्वा विक्रीतं तं[३] नरोत्तमः ।
महर्षिपुत्रं धर्म्मात्मा मोचयामास सुव्रतः ॥८८॥
सत्यव्रतो महाबुद्धिर्भरणं तस्य चाकरोत् ।
विश्वामित्रस्य तुष्ट्यर्थमनुकंपार्थमेव च ॥८९॥
सोऽभवद्गालवो नाम गले बद्धो महातपाः ।
महर्षिः कौशिकस्तातस्तेन[४] वीर्येण मोक्षितः ॥९०॥
तस्य व्रतेन भक्त्या च कृपया च प्रतिज्ञया ।

---

(१) शिखायामिति ख० ।
(२) विक्रीणाति शतेन इति ख० अयमन्वयपाठः ।
(३) व्यक्रीणानमिति क० ञ० । अयन्तु न सम्यक् । विक्रीणन्तमिति ख० । अस्मिन् पक्षे गलबद्धमिति विक्रीणन्तमिति च स्त्रीजनस्य विशेषणं विक्रीणन्तमितिपाठे पूर्व्वश्लोके व्यक्रीणादित्यत्र विक्रेतुमितिपाठः सङ्गतार्थः ।
(४) स्तस्मात्तेन इति ख० ।

विश्वामित्रकलत्रञ्च बभार विनये स्थितः ॥९१॥
हत्वा मृगान् वराहांश्च महिषांश्च वनेचरान् ।
विश्वामित्राश्रमाभ्याशे तन्मांसमपचत्ततः ॥९२॥
उपांशुव्रतमास्थाय दीक्षां द्वादशवार्षिकीं ।
पितुर्नियोगादभजन्नृपे तु वनमास्थिते ॥९३॥
अयोध्याञ्चैव राज्यञ्च तथैवान्तःपुरं मुनिः ।
याज्योपाध्यायसंयोगात् वशिष्ठ परिरक्षितः ॥९४॥
सत्यव्रतस्तु बाल्यात्तु भाविनोऽर्थस्य वै बलात् ।
वशिष्ठेऽभ्यधिकं मन्युं धारयामास मन्युना ॥९५॥
पित्रा हृदं[1] तदा राष्ट्रात् परित्यक्तं स्वमात्मजं ।
न वारयामास मुनिः वशिष्ठः कारणेन वै ॥९६॥
पाणिग्रहणमन्त्राणां निष्ठा स्यात् सप्तमे पदे ।
एवं सत्यव्रतस्तान् वै कृतवान सप्तमे पदे ॥९७॥
जानन् धर्म्मान् वशिष्ठस्तु न च मन्त्रानिहेच्छति ।
इति सत्यव्रते रोषं वशिष्ठामनसाकरोत् ॥९८॥
गुरुर्बुद्ध्या तु भगवान् वशिष्ठः कृतवांस्तदा ।
न तु सत्यव्रताबुध्या[2] उपांशुव्रतमस्य वै ॥९९॥
तस्मिंस्तापरते योयत्पितुरासीन्[3] महामनाः ।
तेन द्वादशवर्षाणि नावर्षत् पाकशासनः ॥१००॥

(१) हृदन्तमिति वक्तव्ये हृदमित्यार्षप्रयोगः ।
(२) न तु सत्यव्रताबुध्या इति श्लोकार्द्धे वाक्यस्य साकाङ्क्षत्वात् समाप्ति-
सूचकपदसंयुक्तश्लोकार्द्धाभावोऽत्र वर्त्तते ।
(३) सत्यव्रत आसीदिति पाठः समीचीनः ।

तेन त्विदानीं बहुधा दीक्षां तां दुर्बलां[1] श्रुतिं।
कुलस्य निष्कृतिः स्वस्य[2] कृतयस्य[3] भवेदिति ॥१०१॥
ततो वसिष्ठो भगवान् पित्रा त्यक्तं न्यवारयत्।
अभिषेक्ष्याम्यहं राज्ये पश्चादेनमिति प्रभुः ॥१०२॥
स तु द्वादशवर्षाणि दीक्षान्तामुद्वहन् बली।
अविद्यमाने मांसे तु वसिष्ठस्य महात्मनः ॥१०३॥
सर्व्वकामदुघां धेनुं संददर्श नृपात्मजः।
तां वै क्रोधाच्च मोहाच्च श्रमाच्चैव क्षुधान्वितः ॥१०४॥
दस्युधर्म्मं गतो दृष्ट्वा जघान बलिनां वरः।
स तु मांसं स्वयं चैव विश्वामित्रस्य चात्मजान् ॥१०५॥
भोजयामास तच्छ्रुत्वा वसिष्ठस्तं तदात्यजत्।
प्रोवाच चैव भगवान् वसिष्ठस्तं नृपात्मजं ॥१०६॥
पातये क्रूर हे क्रूर तव शङ्कुमयामयं।
यदि ते त्रीणि शङ्कूनि न स्युर्हि पुरुषाधम ॥१०७॥
पितुश्चापरितोषेण गुरोर्दोग्ध्रीवधेन च।
अप्रोक्षितोपयोगाच्च[4] त्रिविधस्ते व्यतिक्रमः ॥१०८॥

---

(१) अत्र क्रियाया उद्वहनीयत्वेन दीक्षा सा दुर्ब्बला इति प्रथमान्तपाठो-युक्तः। अथवा श्लोकार्द्धो निपतितः।

(२) निष्कृतिस्तस्येतिपाठः सुसङ्गतः।

(३) आदर्शपुस्तकमात्रे कृतयस्य, कृतेयस्य इत्यसम्बद्धपाठो दृष्टः। अत्र कृतेऽमुष्मिन्निति पाठः सङ्गतार्थः।

(४) अत्र क० ख० ग० ङ० च० ज० पुस्तकेषु भ्रान्तियुक्तपाठा वर्त्तन्ते। यथा, प्रोक्षतोप्रयोगाच्च, प्रोषितोपयोगाच्च, प्रोषितोपायोगमाच्च,

एवं स त्रीणि शङ्कूनि दृष्ट्वा तस्य महातपाः ।
त्रिशङ्कुरिति होवाच त्रिशङ्कुस्तेन स स्मृतः ॥१०८॥
विश्वामित्रस्तु दाराणामागतोभरणे कृते ।
ततस्तस्मै वरं प्रादात्तदा प्रीतस्त्रिशङ्कवे ॥११०॥
छन्द्यमानो(१) वरेणाथ गुरुं वव्रे नृपात्मजः ।
अनावृष्टिभये तस्मिन् गते द्वादशवार्षिके(२) ॥१११॥
अभिषिच्य राज्येपित्र्ये(३) याजयामास तं (४) मुनिः ।
मिषतां देवतानाञ्च वशिष्ठस्य च कौशिकः ।
सशरीरं तदा तं वै दिवमारोपयत् प्रभुः ॥११२॥
मिषतस्तु वशिष्ठस्य तदद्भुतमिवाभवत् ।
अत्राप्युदाहरन्तीमौ श्लोकौ पौराणिका जनाः ॥११३॥
विश्वामित्रप्रसादेन त्रिशङ्कुर्दिवि राजते ।
देवैः सार्द्धं महातेजाऽनुग्रहात्तस्य धीमतः ॥११४॥

अप्रोक्षितोप्रयोगाच्च, अप्रोषितोप्रयोगाच्च । छ० पुस्तके एतच्छ्लोकार्द्धस्याभावोवर्त्तते ।

(१) लभ्यमानो इति क० अ० । अयन्तु न सम्यक् ।

(२) अनावृष्टिभयस्तस्मिन् गतोद्वादशवार्षिकः इतिपाठोऽत्र साधीयान् । अथवा अत्र श्लोके वव्रे इत्यनेनापेक्षितस्य सत्यव्रतप्रार्थितविषयस्याभावदर्शनात् अस्मात् श्लोकात् परं कतिपयश्लोकपतनं सम्भावनीयं ।

(३) अत्र छन्दोभङ्गात् पितृराज्ये इतिपाठोयुक्तः ।

(४) अत्र क० ख० ग० ङ० च० छ० अ० पुस्तकेषु असम्पूर्णपाठाः सन्ति । यथा, अभिषिच्या राज्यपित्र्ये यायाजयामास, अभिषिच्ये तदा राज्ये योजयामास, अभिषिच्य तदा राज्ये योजयामास, अभिषिच्य राज्ये पित्र्ये याचयामास, अभिषिच्य सुराज्ये पित्रे याजयामास, अभिषिच्या राज्ये पित्र्ये यायाजयामास ।

सनैर्यात्यवशा रथ्या हेमन्ते चक्रमण्डिता ।
अलङ्कृता त्रिभिर्भावैस्त्रिशङ्कुरथभूषिता ॥११५॥
तस्य सत्यरता नाम भार्य्या केकयवंशजा ।
कुमारं जनयामास हरिश्चन्द्रमकल्मषं ॥११६॥
स तु राजा हरिश्चन्द्रस्त्रैशङ्कव इति श्रुतः ।
आहर्त्ता राजसूयस्य सम्राडिति परिश्रुतः ॥११७॥
हरिश्चन्द्रस्य तु सुतो रोहितो नाम वीर्य्यवान् ।
हरितो रोहितस्याथ चञ्चुर्हारीत उच्यते ॥११८॥
विजयश्च सुदेवश्च चञ्चुपुत्रौ बभूवतुः ।
जेता सर्व्वस्य क्षत्रस्य विजयस्तेन स स्मृतः ॥११९॥
रुरुक[1]स्तनयस्तस्य[2] राजा धर्म्मार्थकोविदः ।
रुरुकात् धृतकः पुत्रस्तस्माद्बाहुश्च जज्ञिवान् ॥१२०॥
हैहयैस्तालजङ्घैश्च निरस्तो व्यसनी नृपः ।
शकैर्यवनकाम्बोजैः पारदैः पल्हवैस्तथा ॥१२१॥
नात्यर्थं धार्म्मिकोऽभूत् स धर्म्ये सत्ययुगे[3] तथा[4] ।
सगरस्तु सुतो बाहोर्जज्ञे सह गरेण वै ।
भृगोराश्रममासाद्य तुर्वेण[5] परिरक्षितः ॥१२२॥

(१) वृतुक इति क० ज० । तुतुक इति छ० ।
(२) तस्येतिपाठः साधुः ।
(३) धर्म्मे सत्रियुगे इति क० ज० । धर्म्मे सतियुगे इति ख० ङ० च० छ० ।
पाठावेतौ लिपिकरप्रमादजनितौ । एष श्लोको ग० पुस्तके नास्ति ।
(४) सत इति पाठः समीचीनः ।
(५) कुर्व्वेणेति क० छ० ज० । गन्धर्व्वेणेति ख० । अत्र ग० पुस्तके न कश्चित् पाठो वर्त्तते । परन्तु और्व्वेणेति पाठदर्शनादत्र और्व्वेणेति पाठो युक्तः ।

आग्नेयमस्त्रं लब्ध्वा तु भार्गवात् सगरो नृपः ।
जघान पृथिवीं गत्वा तालजङ्घान् सहैहयान् ॥१२३॥
शकानां पल्हवानाञ्च धर्मान्निरसदच्युतः[1] ।
क्षत्रियाणां तथा तेषां पारदानाञ्च धर्मवित् ॥१२४॥

ऋषय ऊचुः । कथं स सागरो राजा गरेण सह जज्ञिवान् ।
किमर्थञ्च शकादीनं क्षत्रियाणां महौजसां ।
धर्मान् कुलोचितान् क्रुद्धो राजा निरसदच्युतः[2] ॥१२५॥

सूत उवाच । बाहोर्व्यसनिनस्तस्य हृतं राज्यं पुरा किल ।
हैहयैस्तालजङ्घैश्च शकैः सार्द्धं समागतैः ॥१२६॥
यवनाः पारदाश्चैव काम्बोजाः पल्हवास्तथा ।
हैहयार्थं पराक्रान्ता एते पञ्चगणास्तदा ॥१२७॥
हृतं राज्यं बलीयोभिरेभिः क्षत्रियपुङ्गवैः ।
हृतराज्यस्तदा बाहुः संन्यस्य तु तदा नृपः ।
वनं प्रविश्य धर्मात्मा सह पत्न्या तपोऽचरत् ॥१२८॥
कस्यचित्त्वथ कालस्य तोयार्थं प्रस्थितो नृपः ।
वृद्धत्वाद्दुर्बलत्वाच्च अन्तरा स ममार च ॥१२९॥
पत्नी तु यादवी तस्य सगर्भा पृष्ठतोऽन्वगात्[3] ।
सपत्न्या तु गरस्तस्यै दत्तो गर्भजिघांसया ॥१३०॥
सा तु भर्तुश्चितां कृत्वा वह्निं तां समरोहयत्[4] ।

---

(१) निरसयत्ततः इतिपाठोऽविशुद्धः ।
(२) निरसयत् ततः इतिपाठेऽत्र प्रयोगस्तु समुचितः ।
(३) पृष्ठतोऽन्वयात् इति ख० ग० ।
(४) समरोहदित्यर्थे समरोहयदित्यार्षः ।

और्वस्तां भार्गवो दृष्ट्वा कारुण्याद्विन्यवर्त्तयत् ॥१३१॥
तस्याश्रमे तु तङ्गर्भं सा गरेण तदा सह ।
व्याजायत[1] महाबाहुं सगरं नाम धार्मिकं ॥१३२॥
और्वस्तु जातकर्मादीन् कृत्वा तस्य महात्मनः ।
अध्याप्य वेदशास्त्राणि ततोऽस्त्रं प्रत्यपादयत् ॥१३३॥
जामदग्न्यात्तदाग्नेयममरैरपि दुःसहं ।
स तेनास्त्रबलेनैव बलेन च समन्वितः ।
जघान हैहयान् क्रुद्धो रुद्रः पशुगणानिव ॥१३४॥
ततः शकान् सयवनान् काम्बोजान् पारदांस्तथा ।
पल्हवांश्चैव निःशेषान् कर्त्तुं व्यवसितो नृपः ॥१३५॥
ते बध्यमाना वीरेण सगरेण महात्मना ।
वसिष्ठं शरणं सर्व्वे प्रपन्नाः शरणैषिणः ॥१३६॥
वसिष्ठस्तान् तथेत्युक्त्वा समयेन[2] महामुनिः ।
सगरं वारयामास तेषान्दत्त्वाऽभयन्तदा ॥१३७॥
सगरः स्वाम्प्रतिज्ञाञ्च गुरोर्वाक्यं निशम्य च ।
धर्म्मं जघान तेषां वै वेषान्यत्वं चकार ह ॥१३८॥
अर्द्धं शकानां शिरसो मुण्डयित्वा व्यसर्जयत् ।
यवनानां शिरः सर्व्वं काम्बोजानान्तथैव च ॥१३९॥
पारदा मुक्तकेशाश्च पल्हवाः श्मश्रुधारिणः ।

---

(१) जनयामासेत्यर्थे व्यजायत इत्यार्षः ।
(२) वसिष्ठश्चैवमुक्त्वा तु विनयेन महामुनिरिति क० छ० ज० । वसिष्ठस्तान् ततो दृष्ट्वा नियमेन तदा मुनिरिति ख० ग० ।

निःस्वाध्यायवषट्काराः कृतास्तेन महात्मना ॥१४०॥
शका यवनकाम्बोजाः पल्हवाः पारदैः सह ।
कोलिसर्पा माहिषिका दार्व्वाश्चोलाः खसास्तथा[1] ॥१४१॥
सर्व्वे ते क्षत्रियगणा धर्म्मस्तेषां निराकृतः ।
वसिष्ठवचनात्पूर्वं सगरेण महात्मना ॥१४२॥
स धर्मविजयी राजा विजित्वेमां वसुन्धरां ।
अश्वं विचारयामास वाजिमेधाय दीक्षितः ॥१४३॥
तस्य चारयतः[2] सोऽश्वः समुद्रं पूर्वदक्षिणे ।
वेलासमीपेऽपहृतोभूमिश्चैव प्रवेशितः ॥१४४॥
स तन्देशं सुतैः सर्वैः खनयामास पार्थिवः ।
आसेदुश्च ततस्तस्मिन् तदन्तस्ते महार्णवे ॥१४५॥
तमादिपुरुषं देवं हरिं कृष्णं प्रजापतिं ।
विष्णुं कपिलरूपेण हंसं नारायणं प्रभुं ॥१४६॥
तस्य चक्षुः समासाद्य तेजस्तत् प्रतिपद्यते ।
दग्धा. पुत्रास्तदा सर्वे चत्वारस्त्ववशेषिताः ॥१४७॥
वर्हिकेतुः सकेतुश्च तथा धर्म्मरतस्त्वयः[3] ।

(१) कलिस्पृशा माहिविषां कादार्वाला खसास्तथा इति क० । कलि-स्पृशा माहियका दार्वा श्योनाः खसास्तथा इति ख० । कलिस्पर्शा महियका व्योमश्वोनाःखसास्तथा इति ग० । कलिस्पर्शा माहिषिका दार्वालाः खसास्तथा इति च० । कलिस्पृशां माहिविषा कादार्वालाः खसास्तथा इति ज० । एषां लिपिकरप्रमादजनितत्वेऽपि संशोध्य तथ्यमवधार्य्यतां ।
(२) वारयतः इति क० ज० ।
(३) स्त्र थ इति ख० ग० ङ० च० छ० ज० ।

शूरः पञ्चवनश्चैव तस्य वंशकराः प्रभो ॥१४८॥
प्रादाच्च तस्य भगवान् हरिर्नारायणो वरान् ।
अजय्यत्वं स्ववंशस्य वाजिमेधव्रतं तथा ।
विभुं पुत्रं समुद्रञ्च स्वर्गे वासं तथाक्षयं ॥१४९॥
स समुद्राश्वमादाय ववन्दे सरितांपतिः ।
सागरत्वं च लेभे स कर्मणा तेन तस्य वै ॥१५०॥
तं चाश्वमेधिकं सोऽश्वं समुद्रात् प्राप्य पार्थिवः ।
आजहाराश्वमेधानां शतं चैव पुनः पुनः ॥१५१॥
षष्टिपुत्रसहस्राणि दग्धान्यश्वानुसारिणां ।
तेषां नारायणं तेजः प्रविष्टानां महात्मनां ।
पुत्राणान्तु सहस्राणि षष्टिस्तु इति नः श्रुतं ॥१५२॥
ऋषय ऊचुः । सगरस्यात्मजा शूराः कथं जाता महाबलाः ।
विक्रान्ताः षष्टिसाहस्रा विधिना केन वा वद ॥१५३॥
सूत उवाच । द्वे पत्न्यौ सगरस्यास्तां तपसा दग्धकिल्बिषे ।
ज्येष्ठा विदर्भदुहिता केशिनी नाम नामतः ॥१५४॥
कनीयसी तु या तस्य पत्नी परमधर्मिणी ।
अरिष्टनेमिदुहिता रूपेणाप्रतिमा भुवि ॥१५५॥
और्वस्ताभ्यां वरं प्रादात् तपसाराधितः प्रभुः ।
एका जनिष्यते पुत्रं वंशकर्त्तारमीप्सितं ।
षष्टिपुत्रसहस्राणि द्वितीया जनयिष्यति ॥१५६॥
मुनेस्तु वचनं श्रुत्वा केशिनी पुत्रमेककं ।
वंशस्य कारणं श्रेष्ठा जग्राह नृपसंसदि ॥१५७॥

षष्टिपुत्रसहस्राणि सुपर्णभगिनी तथा ।
महात्मनस्तु जग्राह सुमतिः[१] सुमतिर्यथा[२] ॥१५८॥
अथ काले गते ज्येष्ठा ज्येष्ठं पुत्रं व्यजायत ।
असमञ्ज इति ख्यातं काकुत्स्थं सगरात्मजं ॥१५९॥
सुमतिस्त्वपि जज्ञे वै गर्भतुम्बं यशस्विनी ।
षष्टिपुत्रसहस्राणि तुम्बमध्यात् विनिःसृताः[३] ॥१६०॥
घृतपूर्णेषु कुम्भेषु तान् गर्भान् न्यदधत्ततः ।
धात्रीश्चैकैकशः प्रादात तावतीः पोषणे नृपः ॥१६१॥
ततोनवसु मासेषु समुत्तस्थुर्यथासुखं ।
कुमारास्ते महाभागाः सगरप्रीतिवर्द्धनाः ॥१६२॥
कालेन महता चैव यौवनं प्रतिपेदिरे ।
षष्टिपुत्रसहस्राणि तेषामश्वानुसारिणां ॥१६३॥
स तु ज्येष्ठोनरव्याघ्रः सगरस्यात्मसम्भवः ।
असमञ्ज इतिख्यातोवर्हिकेतुर्महाबलः ॥१६४॥
पौराणामहिते युक्तः पित्रा निर्वासितः पुरा ।
तस्य पुत्रोऽंशुमान्नाम असमञ्जस्य वीर्यवान् ॥१६५॥
तस्य पुत्रस्तु धर्मात्मा दिलीप इति विश्रुतः ।
दिलीपात्तु महातेजा वीरोजातोभगीरथः[४] ॥१६६॥

(१) महात्मा तु समहतोजग्राह इति ङ० च० अ० ।
(२) सुमतिस्तथाऽइति ङ० । सुमता तथा इति च० अ० ।
(३) सर्व्वेष्वादर्शपुस्तकेषु विनिःसृताः इतिपाठोवर्त्तते । परन्त्वत्र विनिः-
सृताः इतिप्रयोगोविशुद्धः ।
(४) महारथः इति ङ० च० ।

येन गङ्गा सरिच्छ्रेष्ठा विमानैरुपशोभिता ।
ईजाऽनेन[1] समुद्रादै दुहितृत्वेन कल्पिता ।
अत्राप्युदाहरन्तीमं श्लोकं पौराणिका जनाः ॥१६७॥
भगीरथस्तु तां गङ्गामानयामास कर्म्मभिः ।
तस्माद्भागीरथी गङ्गा कथ्यते वंशवित्तमैः ॥१६८॥
भगीरथसुतश्चापि श्रुतोनाम बभूव ह ।
नाभागस्तस्य दायादो नित्यं धर्म्मपरायणः ॥१६९॥
अम्बरीषः सुतस्तस्य सिन्धुद्वीपस्ततोऽभवत् ।
एवं वंशपुराणज्ञा गायन्तीतिपरिश्रुतं ॥१७०॥
नाभागेरम्बरीषस्य भुजाभ्यां परिपालिता ।
बभूव वसुधात्यर्थं तापत्रयविवर्ज्जिता ॥१७१॥
आयुतायुः सुतस्तस्य सिन्धुद्वीपस्य वीर्य्यवान् ।
आयुतायोस्तु दायाद ऋतुपर्णो महायशाः ॥१७२॥
दिव्याक्षहृदयज्ञोऽसौ राजा नलसखो बली ।
नलौ द्वाविति विख्यातौ पुराणेषु दृढव्रतौ ॥१७३॥
वीरसेनात्मजश्चैव यश्चेक्ष्वाकुकुलोद्वहः ।
ऋतुपर्णस्य पुत्रोऽभूत् सर्व्वकामो जनेश्वरः ॥१७४॥
सुदासस्तस्य तनयो राजा त्वंसमुखो[2] भवत् ।

---

(१) इजाऽनेन इति ङ० च० ।
(२) क०पुस्तकव्यतिरिक्तादर्शपुस्तकेषु अत्र भ्रान्तिजनितपाठावर्त्तनं यथा, राजा ह्यासमुखो इति ख०, राजश्वासमुखो इति ग०, राजार्ष समखो इति ङ०, राजार्षा समुखो इति च० छ० ज० ।

सुदासस्य सुतः प्रोक्तः सौदासो नाम पार्थिवः ॥१७५॥
ख्यातः कल्माषपादो वै नाम्ना मित्रसहश्च सः ।
वशिष्ठस्तु महातेजाः क्षेत्रे कल्माषपादके ।
अश्मकं जनयामास इक्ष्वाकुकुलवृद्धये ॥१७६॥
अश्मकस्योरकामस्तु मूलकस्तत्सुतोऽभवत् ।
अथाप्युदाहरन्तीमं मूलकं वै नृपं प्रति ॥१७७॥
स हि रामभयाद्राजा स्त्रीभिः परिवृतोऽवसत् ।
विवस्त्रस्त्राणमिच्छन् वै नारीकवचमीश्वरः[1] ॥१७८॥
मूलकस्यापि धर्मात्मा राजा शतरथः स्मृतः ।
तस्मात् शतरथाज्जज्ञे राजा चैडविडो बली ॥१७९॥
आसीत्त्वैडविडः श्रीमान् कृतशर्मा प्रतापवान् ।
पुत्रो विश्वमहत्तस्य[2] पुत्रीकस्यस्य जायत[3] ॥१८०॥
दिलीपस्तस्य पुत्रोऽभूत् खट्वाङ्गद[4] इति श्रुतिः ।
येन स्वर्गादिहागम्य मुहूर्तं प्राप्य जीवितं ।

---

(१) माश्रित इति ख० ।

(२) ख० ग० पुस्तकयोरेतच्छ्लोकार्द्धं न विद्यते । क० ङ० च० छ० ज०-पुस्तकेषु विश्वमहत्तस्येतिपाठो वर्त्तते । अत्र विश्वमहांस्तस्येतिपाठः समीचीनः ।

(३) पुत्रीकस्य व्यजायत इति ङ० च० छ० । पुत्रीकस्य व्यतायता इति क० ज० । अनयोर्भ्रमजनितत्वेन वाक्यार्थप्रतिपत्तिर्न घटते । पुस्तिकायां व्यजायत इति प्रयुक्ते तु सुगमैव ।

(४) खट्वाङ्गद इति ङ० । षट्वाङ्ग इति च० । अत्र षड्ङ्गदः अथवा खट्वाङ्गदः इतिपाठः सम्भवितुमर्हति ।

ययोऽभिसंहिता लोका बुध्या सत्येन चैव हि ॥१८१॥
दीर्घबाहुः सुतस्तस्य रघुस्तस्मादजायत ।
अजः पुत्त्रो रघोश्चापि तस्मादजज्ञे स वीर्य्यवान् ।
राजा दशरथोनाम इक्ष्वाकुकुलनन्दनः ॥१८२॥
रामोदाशरथिर्वीरोधर्म्मज्ञोलोकविश्रुतः ।
भरतोलक्ष्मणश्चैव शत्रुघ्नश्च महाबलः ॥१८३॥
माधवं लवणं हत्वा गत्वा मधुवनञ्च तत ।
शत्रुघ्नेन पुरी तस्य मथुरा सन्निवेशिता ॥१८४॥
सुबाहुः शूरसेनश्च शत्रुघ्नसहितावुभौ ।
पालयामासतुः शूरौ वैदेह्यौ मथुरां पुरीं ॥१८५॥
अङ्गदश्चन्द्रकेतुश्च लक्ष्मणस्यात्मजावुभौ ।
हिमवत्पर्व्वताभ्यासे स्फीतौ जनपदौ तयाः ॥१८६॥
अङ्गदस्याङ्गदीया तु देशे कारपथे पुरी ।
चन्द्रकेतोस्तु मल्लस्य चन्द्रवक्रा(१) पुरी शुभा ॥१८७॥
भरतस्यात्मजौ वीरौ तक्षः पुष्कर एव च ।
गान्धारविषये सिद्धे तयोः पुर्य्यौ महात्मनोः ॥१८८॥
तक्षस्य दिक्षु विख्याता रम्या तक्षशिला पुरी ।
पुष्करस्यापि वीरस्य विख्याता पुष्करावती ॥१८९॥
गाथां चैवात्र गायन्ति ये पुराणविदोजनाः ।
रामे निबद्धास्तत्त्वार्था माहात्म्यात्तस्य धीमतः ॥१९०॥

(१) चन्द्रचक्रा इति क० ज० , चन्द्रचन्द्रा इति ख० ।

श्यामो युवा लोहिताक्षो दीप्तास्यो मितभाषितः(१) ।
आजानुबाहुः सुमुखः सिंहस्कन्धो महाभुजः ॥१८१॥
दशवर्षसहस्राणि रामो राज्यमकारयत् ।
ऋक्सामयजुषां घोषो ज्याघोषश्च महास्वनः ॥१८२॥
अविच्छिन्नोऽभवद्राष्ट्रे(२) दीयतां भुज्यतामिति ।
जनस्थाने वसन् कार्य्यं त्रिदशानाञ्चकार सः ॥१८३॥
तमागस्कारिणं पूर्व्वं पौलस्त्यं मनुजर्षभः ।
सीतायाः पदमन्विच्छन् निजघान महायशाः ॥१८४॥
सत्त्ववान् गुणसम्पन्नो दीप्यमानः स्वतेजसा ।
अति सूर्य्यञ्च वह्निञ्च रामो दाशरथिर्बभौ ॥१८५॥
एवमेव महाबाहुरिक्ष्वाकुकुलनन्दनः ।
रावणं सगणं हत्वा दिवमाचक्रमे विभुः ॥१८६॥
श्रीरामस्यात्मजो जज्ञे कुश इत्यभिधीयते ।
लवश्चान्यो महावीर्य्य(३) स्तयोर्देशौ निबोधत ॥१८६॥
कुशस्य कोशला राज्यं पुरी चापि कुशस्थली ।
रम्या निवेशिता(४) तेन विन्ध्यपर्व्वतसानुषु ॥१८७॥
उत्तरकोशले राज्यं लवस्य च महात्मनः ।

(१) मितभाषिता इति क० ङ० च० छ० ज० ।
(२) राष्ट्रे इति ख० ग० घ० ।
(३) रिक्ष्वाकुकुलनन्दन इत्यादि लवश्चान्यो महावीर्य्य इत्यन्तं क० ङ० च० छ० ज० पुस्तकेषु पतितं ।
(४) निवासिता इति ख० ग० ।

श्रावस्ती लोकविख्याता कुशवंशं निबोधत ॥१८८॥
कुशस्य पुत्रो धर्मात्मा ह्यतिथिः सुप्रियातिथिः ।
अतिथेरपि विख्यातो निषधो नाम पार्थिवः ॥१८९॥
निषधस्य नलः पुत्रो नभः पुत्रो नलस्य तु ।
नभसः पुण्डरीकस्तु क्षेमधन्वा ततः स्मृतः ॥२००॥
क्षेमधन्वसुतो राजा देवानीकः प्रतापवान् ।
आसीदहीनगुर्नाम देवानीकात्मजः प्रभुः ॥२०१॥
अहीनगोस्तु दायादः पारिपात्रो[1] महायशाः ।
दलस्तस्यात्मजश्चापि तस्माज्जज्ञे बलो[2] नृपः ॥२०२॥
औक्थो नाम स धर्मात्मा बलपुत्रो बभूव ह ।
वज्रनाभः सुतस्तस्य शङ्खनस्तस्य चात्मजः ॥२०३॥
शङ्खनस्य सुतो विद्वान् व्युषिताश्व इति श्रुतः ।
व्युषिताश्वसुतश्चापि राजा विश्वसहः[3] किल ॥२०४॥
हिरण्यनाभः कौशल्यो वशिष्ठस्तत्सुतोऽभवत् ।
पौत्रस्य जैमिनेः शिष्यः स्मृतः सर्व्वेषु शास्त्रेषु ॥२०५॥
शतानि संहितानान्तु पञ्च योऽधीतवांस्ततः ।
तस्मादधिगतो योगो याज्ञवल्क्येन धीमता ॥२०६॥

---

(१) पारियात्रो इति ङ० च० छ० । एषश्लोकः ख० ग० पुस्तकयोर्निपतितः ।
(२) सलो इति क० ङ० च० । सतो इति छ० ज० । किन्तु एतेष्वेव परश्लोके बलपुत्र इति प्रयोगोऽस्ति ।
(३) विश्वसहः इति क० ज० ।

पुष्यस्तस्य सुतोविद्वान् ध्रुवसन्धिश्च तत्सुतः ।
सुदर्शनस्तस्य सुतो अग्निवर्णः सुदर्शनात ॥२०७॥
अग्निवर्णास्य शीघ्रस्तु शीघ्रकस्य मनुः[1] स्मृतः ।
मनुस्तु योगमास्थाय कलापग्राम[2] मास्थितः ।
एकोनविंशप्रयुगे क्षत्रप्रावर्त्तकः प्रभुः ॥२०८॥
प्रसुश्रुतोमनोः पुत्रः सुसन्धिस्तस्य चात्मज ।
सुसन्धेश्च तथामर्षः सहस्वान्नाम नामतः ॥२०९॥
आसीत्सहस्वतः पुत्रोराजा विश्रुतवानिति ।
तस्यासीत् विश्रुतवतः पुत्रोराजा बृहद्बलः ॥२१०॥
एते इक्ष्वाकुदायादाः राजानः प्रायशः स्मृताः ।
वंशे प्रधानाः ये तेऽस्मिन् प्राधान्येन तु कीर्त्तिताः ॥२११॥
पठन् सम्यगिमां सृष्टिमादित्यस्य विवस्वतः ।
प्रजावानेति सायोज्यं मनोर्वैवस्वतस्य सः ॥२१२॥
श्राद्धदेवस्य देवस्य प्रजानां पुष्टिदस्य च ।
विपाप्मा विरजाश्चैव आयुष्मान् भवतेच्युतः ॥२१३॥

इति श्रीमहापुराणे वायुप्रोक्ते वैवस्वतमनुवंशवर्णनं नाम
षड्विंशोऽध्यायः समाप्तः ॥

---

(१) मरुरिति ङ० च० । अनयोरुत्तरत्र मनोः पुत्र इतिपाठदर्शनाद-
त्रापि मनुरितिपाठोयुक्तः ।
(२) कलापग्राममिति क० च० ।

अथ सप्तविंशोऽध्यायः ।

वैवस्वतमनुवंशकीर्त्तनं ।

सूत उवाच । अनुजस्य विकुक्षेस्तु निमेर्वंशं निबोधत ।
योऽसौ निवेशयामास पुरन्देवपुरोपमं ॥१॥
जयन्तमिति विख्यातं गौतमस्याश्रमाभितः ।
यस्यान्ववाये यज्ञे वै जनकादृषिसत्तमात् ॥२॥
नेमिर्नाम सुधर्मात्मा सर्वसत्त्वनमस्कृतः ।
आसीत् पुत्रोमहाराज इक्ष्वाकोर्भूरितेजसः ॥३॥
स शापेन वसिष्ठस्य विदेहः समपद्यत ।
तस्य पुत्रोमिथिर्नाम जनितः पर्वभिस्त्रिभिः ॥४॥
अरण्यां मथ्यमानायां प्रादुर्भूतोमहायशाः ।
नाम्ना मिथिरितिख्यातोजननाज्जनकोऽभवत् ॥५॥
मिथिर्नाम महावीर्य्योयेनासौमिथिलाभवत् ।
राजासौ जनकोनाम जनकाच्चाप्युदावसुः ॥६॥
उदावसोः सुधर्मात्मा जनितोनन्दिवर्द्धनः ।
नन्दिवर्द्धनतः शूरः सुकेतुर्नाम धार्म्मिकः ॥७॥
सुकेतोरपि धर्म्मात्मा देवरातोमहाबलः ।
देवरातस्य धर्म्मात्मा वृहदुक्थ(१) इति श्रुतिः ॥८॥

(१) वृहद्युक्त इति ख०, वृहद्युक्त इति ग०, वृहदुक्थ इति ङ० । क० ञ० पुस्तकयोः नन्दिवर्द्धनतः शूर इत्यादि सुधृतिस्तस्य चात्मज इत्यन्तं, ङ० पुस्तके देवरातोमहाबलः इत्यादि सुधृतेरपि धर्म्मात्मा इत्यन्तं पाठोनास्ति ।

बृहदुक्थस्य तनयो महावीर्य्यः प्रतापवान् ।
महावीर्य्यस्य धृतिमान् सुधृतिस्तस्य चात्मजः ॥९॥
सुधृतेरपि धर्मात्मा धृष्टकेतुः परन्तपः ।
धृष्टकेतुसुतश्चापि हर्य्यश्वो नाम विश्रुतः ॥१०॥
हर्य्यश्वस्य मरुः पुत्रो मरोः पुत्रः प्रतित्वकः[1] ।
प्रतित्वकस्य धर्मात्मा राजा कीर्त्तिरथः सुतः ॥११॥
पुत्रः कीर्त्तिरथस्यापि देवमीढ इति श्रुतः ।
देवमीढस्य विबुधो विबुधस्य सुतो धृतिः[2] ॥१२॥
महाधृतिसुतो राजा कीर्त्तिरातः[3] प्रतापवान् ।
कीर्त्तिरातात्मजो[4] विद्वान् महारोमेति विश्रुतः ॥१३॥
महारोम्णस्तु विख्यातः स्वर्णरोमा व्यजायत ।
स्वर्णरोमात्मजश्चापि ह्रस्वरोमाभवन्नृपः ॥१४॥
ह्रस्वरोमात्मजो विद्वान् सीरध्वज इति श्रुतिः ।
उद्भिन्ना कृषता येन सीता राज्ञा यशस्विनी ।
रामस्य महिषी साध्वी सुव्रतातिपतिव्रता ॥१५॥
शांशपायन उवाच । कथं सीता समुत्पन्ना कृष्यमाणा यशस्विनी ।
किमर्थश्चाकृषद्राजा क्षेत्रं यस्मिन् बभूव ह ॥१६॥
सूत उवाच । अग्निक्षेत्रे कृष्यमाणे अश्वमेधे महात्मनः ।

---

(१) प्रतिन्धक इति ख०, पितन्धक इति ग०, प्रतिन्धक इति ङ० च० ।
(२) महाधृतिरिति ख० ग० ।
(३) कीर्त्तिरात इति ङ० च० छ० ।
(४) कीर्त्तिरातात्मजो इति ङ० च० छ० । कीर्त्तिरातसुत इति ख० ग० ।

विधिना सुप्रयुक्तेन तस्मात्तातु समुत्थिता ॥१७॥
सीरध्वजात्तु जातस्तु भानुमान्नाम मैथिलः ।
भ्राता कुशध्वजस्तस्य स काश्याधिपति(१) र्नृपः ॥१८॥
तस्य भानुमतः पुत्रः प्रद्युम्नश्च प्रतापवान् ।
मुनिस्तस्य सुतश्चापि तस्मादूर्जवहः सुतः ॥१९॥
ऊर्जवाहात् सुतद्वाजः शकुनिस्तस्य चात्मजः ।
स्वागतः शकुनेः पुत्रः सुवर्चास्तत्सुतः स्मृतः ॥२०॥
श्रुतो यस्तस्य दायादः सुश्रुतस्तस्य चात्मजः ।
सुश्रुतस्य जयः पुत्रो जयस्य विजयः सुतः ॥२१॥
विजयस्य ऋतः(२) पुत्र ऋतस्य सुनयः सुतः ।
सुनयाद्वीतहव्यस्तु वीतहव्यात्मजो धृतिः ॥२२॥
धृतेस्तु बहुलाश्वोऽभूद्बहुलाश्वसुतः कृतिः ।
तस्मिन् सन्तिष्ठते वंशो जनकानां महात्मनां ।
इत्येते मैथिलाः प्रोक्ताः सोमस्यापि निबोधत ॥२३॥

इति श्रीमहापुराणे वायुप्रोक्ते वैवस्वतमनुवंशकीर्त्तनं नाम
सप्तविंशोऽध्यायः समाप्तः ॥

---

(१) काश्याधिपतिरित्यत्र सन्धिरार्षः ।
(२) ऋतः इति क० ख० ।

अथ अष्टाविंशोऽध्यायः ।

तत्र सोमजन्मविवरणं ।

सूत उवाच । पिता सोमस्य वै विप्रा जज्ञेऽत्रिर्भगवानृषिः ।

तत्रात्रिः सर्वलोकानां तस्थौ स्वेनमये(१) धृतः ॥१॥

कर्म्मणा मनसा वाचा शुभान्येव समाचरन् ।

काष्ठकुड्यशिलाभूत ऊर्द्ध्वबाहुर्महाद्युतिः ॥२॥

सुदुश्चरं नाम तपोऽयेन तप्तं महत्पुरा ।

त्रीणि वर्षसहस्राणि दिव्यानीति हि नः श्रुतं ॥३॥

तस्योर्द्ध्वरेतसस्तत्र स्थितस्यानिमिषस्य ह ।

सोमत्वन्तनुरापेदे महाबुद्धिः स वै द्विजः ॥४॥

ऊर्द्ध्वमाचक्रमे तस्य सोमत्वं भावितात्मनः ।

सोमः सुस्राव नेत्राभ्यां दश वा द्योतयन् दिशः ॥५॥

तं गर्भं विधिनादिष्टा दश देव्यो दधुस्तदा ।

समेत्यधारयामासुर्वचतास्समशक्नवान्(२) ॥६॥

स ताभ्यः सहसैवाथ दिग्भ्यो गर्भं प्रभान्वितः ।

---

(१) स्वेनमये धृतः इति क० ङ० छ० ज० । तेन मचीभूतः इति ख०ग० । अत्र स्वे नियमे धृतः इति, स्वेन यमे धृत इति, स्वात्ममयोऽत्र इति वा पाठोऽर्थप्रतिपत्तिकरः ।

(२) एतच्छ्लोकार्द्धं मूले प्रदर्शिताकारं आदर्शपुस्तकमात्रे वर्त्तते । किन्तु लेखकप्रमादजनितत्वेन वाक्यार्थप्रतिपत्तिर्दुष्करा । तस्मादयमेव पाठः सम्भावनीयः । यथा, समं ता धारयामासुर्न च ताः समशक्नुवन् ।

ययात्रभासयन् लोकान् शीतांशुः सर्वभावनः(१) ॥७॥
यदा न धारणे शक्तास्तस्य गर्भस्य ताः स्त्रियः ।
ततः स ताभिः शीतांशुर्निपपात वसुन्धरां ॥८॥
पतन्तं सोममालोक्य ब्रह्मा लोकपितामहः ।
रथमारोपयामास लोकानां हितकाम्यया ॥९॥
स हि देवमयो विप्राः धर्म्मार्थी सत्यसङ्गरः(२) ।
युक्तो वाजिसहस्रेण सितेनेति हि नः श्रुतं(३) ॥१०॥
तस्मिन्निपतिते देवाः पुत्रेऽत्रेः परमात्मनि ।
तुष्टुवुर्ब्रह्मणः पुत्राः मानसाः सप्त विश्रुताः ॥११॥
तथैवाङ्गिरसस्तस्य भृगोश्चैवात्मजास्तथा ।
ऋग्भिर्यजुर्भिर्बहुभिरथर्वाङ्गिरसैरपि ॥१२॥
ततः संस्तूयमानस्य तेजः सोमस्य भास्वतः ।
आप्यायमानं लोकांस्त्रीन् भावयामास सर्व्वशः ॥१३॥
स तेन रथमुख्येन सागरान्तां वसुन्धरां ।
त्रिः सप्तकृत्वा विपुल(४)श्चकाराभिप्रदक्षिणं ॥१४॥
तस्य यच्चापि तत्तेजः पृथिवीमन्वपद्यत ।

---

(१) अत्राकाङ्क्षितया वाक्यसमापकक्रियया श्लोकार्द्धपतनं सूच्यते ।
(२) धर्म्मार्थी सत्यसङ्गर इति ख० । धर्म्मार्थसत्यसङ्गर इति ङ० च० ।
(३) अस्मात् श्लोकात् परं, स तेन रथमुख्येनेति श्लोकः । अनन्तरं, तस्मिन्निपतिते देवा इत्यादिश्लोकाः । इति पाठक्रमः वाक्यार्थस्य सुसङ्गतिकरः ।
(४) वियच्च इति ङ० च० । वियच्च इतिपदस्यार्थास्फुटत्वेन असमञ्जसत्वमवगम्यते । अत्र वियदीतिपाठः सम्यक् ।

ओषध्यस्ताः समुद्भूतास्तेजसा संज्वलन्त्युत ॥१५॥
ताभि(१)र्धारयत्ययं लोकान् प्रजाश्चापि चतुर्विधाः ।
पोष्टा हि भगवान् सोमो जगतो हि द्विजोत्तमाः ॥१६॥
स लब्धतेजास्तपसा संस्तवैस्तैश्च कर्म्मभिः ।
तपस्तेपे महाभागः पद्मानां दशतीर्दश ॥१७॥
हिरण्यवर्णा या देव्यो धारयन्त्यात्मना जगत् ।
विभु(२)स्तासामभवेत् सोमः प्रख्याताः(३) स्वेन कर्म्मणा ॥१८॥
ततस्तस्मै ददौ राज्यं ब्रह्मा ब्रह्मविदांवरः ।
बीजौषधिषु विप्राणामपाञ्च द्विजसत्तमाः ॥१९॥
सोऽभिषिक्तो महातेजा महाराज्येन राजराट्(४) ।
लोकान् भावयामास स्वभावात्तपतांवरः ॥२०॥
सप्तविंशतिरिन्दोस्तु दाक्षायण्यो महाव्रताः ।
ददौ प्रचेतसो दक्षो नक्षत्राणीति या विदुः ॥२१॥
स तत्प्राप्य महद्राज्यं सोमः सोमवतां प्रभुः ।
समाजह्रे(५) राजसूयं सहस्रशतदक्षिणं ॥२२॥
हिरण्यगर्भश्चोद्गाता ब्रह्मा ब्रह्मत्वमेयिवान् ।

---

(१) याभिरिति क० ।
(२) विधुरिति क० छ० ज० । विभुरिति ङ० च० ।
(३) प्रख्यातः ख० ङ० च० ।
(४) अयं श्लोकः ग० छ० पुस्तकयोर्नास्ति । ग० छ० पुस्तकव्यतिरिक्तादर्श-पुस्तकेषु महाराज्येन राजराट् इतिपाठोविद्यते । अत्र महाराज्ये-ऽनु राजराट् इतिप्रयोगः साधुः ।
(५) अत्र समाजह्रे, वा, समायजत् इति पाठः समीचीनः ।

सदस्यस्तत्र भगवान् हरिर्नारायणः प्रभुः।
सनत्कुमारप्रमुखैराद्यैर्ब्रह्मर्षिभिर्वृतः[1] ॥२३॥
दक्षिणामददत्सोमस्त्रीन् लोकानिति नः श्रुतं।
तेभ्यो ब्रह्मर्षिमुख्येभ्यः सदस्येभ्यश्च वै द्विजाः ॥२४॥
तं सिनी च कुहूश्चैव वपुः पुष्टिः प्रभा वसुः।
कीर्त्तिर्धृतिश्च लक्ष्मीश्च नव देव्यः सिषेविरे ॥२५॥
प्राप्यावभृथमव्यग्रः सर्व्वदेवर्षिपूजितः।
अतिराजातिराजेन्द्रो दशधातापयन्प्रभुः ॥२६॥
तदा तत्प्राप्य दुष्प्रापमैश्वर्य्यमृषिसंस्तुतं।
स विभ्रममतिर्विप्रा विनयं विनयाहृतः ॥२७॥
बृहस्पतेः स वै भार्य्यान्तारां नाम यशस्विनीं।
जहार सहसा सर्व्वानवमत्याङ्गिरःसुतान् ॥२८॥
स याच्यमानो देवैश्च तथा देवर्षिभिश्च ह।
नैव व्यसर्ज्जयत्तारां तस्मायाङ्गिरसे तदा ॥२९॥
उशनास्तस्य जग्राह पार्ष्णिमङ्गिरसो द्विजाः।
स हि शिष्यो महातेजाः पितुः पूर्वं बृहस्पतेः ॥३०॥
[2] तेन स्नेहेन भगवान् रुद्रस्तस्य बृहस्पतेः।
पार्ष्णिग्राहोऽभवद्देवः[3] प्रगृह्याजगवन्धनुः ॥३१॥
तेन ब्रह्मर्षिमुख्येभ्यः परमास्त्रं महात्मना।

(१) वृतमिति पाठः साधीयान्।
(२) तेन स्नेहेनेति श्लोकस्य पूर्व्वेण सह सङ्गतिविरहात् अस्मात् प्राक् कतिपयश्लोकपतनमुपलभ्यते।
(३) तच्चेति ख० ग०।

उद्दिश्य देवानुत्सृष्टं येनैषां नाशितं यशः ॥३२॥
तत्र तद्युद्धमभवत् प्रख्यन्तारकामयं ।
देवानां दानवानाञ्च लोकक्षयकरं महत् ॥३३॥
तत्र शिष्टास्तयोदेवास्तुषिताश्चैव ये स्मृताः ।
ब्रह्माणं शरणं जग्मुरादिदेवं पितामहं ॥३४॥
ततोनिवार्य्योशनसं रुद्रं ज्येष्ठञ्च शङ्करं ।
ददावाङ्गिरसे तारां स्वयमेव पितामहः ॥३५॥
अन्तर्व्वत्नीञ्च तां दृष्ट्वा तारान्ताराधिपाननां ।
गर्भमुत्सृजसे न त्वं विप्रः प्राह बृहस्पतिः ॥३६॥
मदीयायां तनौ योनौ गर्भोधार्य्यः कथञ्चन ।
अथो नावसृजत्तन्तु कुमारं दस्युहन्तमं ॥३७॥
इषीकास्तम्बमासाद्य ज्वलन्तमिव पावकं ।
जातमात्रोथ भगवान् देवानामाक्षिपद्वपुः ॥३८॥
ततः संशयमापन्नास्तारामकथयन् सुराः ।
सत्यं ब्रूहि सुतः कस्य सोमस्याथ बृहस्पतेः ॥३९॥
ह्रीयमाना यदा देवान्नाह सा साध्वसाधु वा ।
तदा तां शप्तुमारब्धः कुमारोदस्युहन्तमः ॥४०॥
सन्निवार्य्य तदा ब्रह्मा तारां चन्द्रस्य संशयः ।
यदत्र तथ्यन्तद्ब्रूहि तारे कस्य सुतस्त्वयं ॥४१॥
सा प्राञ्जलिरुवाचेदं ब्रह्माणं वरदं प्रभुं ।
सोमस्येति महात्मानं कुमारन्दस्युहन्तमं(१) ॥४२॥

(१) महात्मैव कुमारोदस्युहन्तमः इतिप्रथमान्तपाठः समीचीनः ।

ततः स तमुपाघ्राय[1] सोमोदाता प्रजापतिः ।
बुध इत्यकरोन्नाम तस्य पुत्रस्य धीमतः ॥४ ३॥
प्रतिपूज्यस्तुगमने समभ्युत्तिष्ठते बुधः[2] ।
उत्पादयामास तदा पुत्रं वै राजपुत्रिका ॥४ ४॥
तस्य पुत्रोमहातेजा बभूवैलः पुरूरवाः ।
उर्वश्यां जज्ञिरे तस्य पुत्राः षट्सुमहौजसः ॥४ ५॥
प्रसह्य धर्षितस्तत्र विवशोराजयक्ष्मणा ।
ततोयक्ष्माभिभूतस्तु सोमः प्रक्षीणमण्डलः ।
जगाम शरणायाथ पितरं सोत्रिमेव तु ॥४ ६॥
तस्य तत्पापशमनं चकारात्रिर्महायशाः ।
स राजयक्ष्मणा मुक्तः श्रिया जज्वाल सर्व्वशः ॥४ ७॥
एतत्सोमस्य वै जन्म कीर्त्तितं द्विजसत्तमाः ।
वंशन्तस्य द्विजश्रेष्ठाः कीर्त्यमानं निबोधत ॥४ ८॥
धन्यमारोग्यमायुष्यं पुण्यङ्कल्मषशोधनं ।
सोमस्य जन्म श्रुत्वैव सर्वपापैः प्रमुच्यते ॥४ ९॥

इति श्रीमहापुराणे वायुप्रोक्ते उपोद्घातपादे सोमोत्पत्तिर्नाम अष्टाविंशोऽध्यायः समाप्तः ॥

---

(१) सुपादायेति ख० ग० ।
(२) बुध इति ग० ङ० च० ।

अथ ऊनत्रिंशोऽध्यायः।

चन्द्रवंशकीर्त्तनं।

सूत उवाच। सोमस्य तु बुधः पुत्रो बुधस्य तु पुरूरवाः।
तेजस्वी दानशीलश्च यज्वा विपुलदक्षिणः ॥१॥
ब्रह्मवादी पराक्रान्तः शत्रुभिर्युधि दुर्जयः।
आहर्त्ता चाग्निहोत्रस्य यज्वनाश्च ददौ महीं ॥२॥
सत्यवाक् कर्म्मबुद्धिश्च(१) कान्तः संवृतमैथुनः।
अतीव(२) पुत्रो लोकेषु रूपेणाप्रतिमोभवत् ॥३॥
तं ब्रह्मवादिनं दान्तं धर्म्मज्ञं सत्यवादिनं।
उर्व्वशी वरयामास हित्वा मानं यशस्विनी ॥४॥
तया सहावसद्राजा दशवर्षाणि चाष्ट च।
सप्त(३) षट् सप्त चाष्टौ च दश चाष्टौ च वीर्य्यवान् ॥५॥
वने चैत्ररथे रम्ये तथा मन्दाकिनीतटे।
अलकायां विशालायां नन्दने च वनोत्तमे ॥६॥
गन्धमादनपादेषु मेरुशृङ्गे नगोत्तमे।
उत्तरांश्च कुरून् प्राप्य कलापग्राम(४) मेव च ॥७॥
एतेषु वनमुख्येषु सुरैराचरितेषु च।
उर्व्वश्या सहितो राजा रेमे परमया मुदा ॥८॥

---

(१) धर्म्मबुद्धिश्चेति ख० च०।
(२) यतीव इति क० ज०।
(३) पञ्च इति ङ० च०।
(४) कलापग्राममिति ङ० च०।

ऋषय ऊचुः। गन्धर्वी चोर्वशी देवी राजानं मानुषं कथं।
देवानुत्सृज्य सम्प्राप्ता तन्नोब्रूहि बहुश्रुत ॥९॥
सूत उवाच। ब्रह्मशापाभिभूता सा मानुषं समुपस्थिता।
ऐलं तु तं वरारोहा समयेन व्यवस्थिता ॥१०॥
आत्मनः शापमोक्षार्थं नियमं सा चकार तु[1]।
अनग्नदर्शनञ्चैव अकामात् सह मैथुनं।
द्वौ मेषौ शयनाभ्याशे स[2] तावद्भवतिष्ठते।
घृतमात्रं तथाहारः कालमेकन्तु पार्थिव ॥११॥
यद्येष समयोराजन यावत्कालञ्च ते दृढं।
तावत्कालन्तु वत्स्यामि एष नः समयः कृतः ॥१२॥
तस्यास्तं समयं सर्वं स राजा पर्यपालयत्।
एवं सा चावसत् तस्मिन्[3] पुरूरवसि भामिनी ॥१३॥
वर्षाण्यथ चतुःषष्टिं तद्भक्त्या शापमोहिता।
उर्वशी मानुषं प्राप्ता गन्धर्वाश्चिन्तयान्विताः ॥१४॥
गन्धर्वा ऊचुः। चिन्तयध्वं महाभागा यथा सा तु वराङ्गना।
आगच्छेत्तु पुनर्देवानुर्वशी स्वर्गभूषणा ॥१५॥
ततोविश्वावसुर्नाम तत्राह वदतांवरः।
मया[4] तु समयस्तत्र क्रियमानोमतोनघः ॥१६॥

(१) च इति ख०।
(२) सा इतिप्रयोगः साधुः।
(३) आदर्शपुस्तकमात्रे तेनेतिपाठोऽस्ति। परन्तु नायं समीचीनः।
(४) आदर्शपुस्तकमात्रे मयेतिपाठोवर्त्तते अयन्तु न सम्यक्।

समयव्युत्क्रमात् सा वै राजानन्त्यक्ष्यते यथा[१] ।
तदहं वच्मि वः सर्वं यथा त्यक्ष्यति सा नृपं ॥१७॥
सहसा[२] योगमेष्यामि युष्माकं कार्यसिद्धये[३] ।
एवमुक्त्वा गतस्तत्र प्रतिष्ठानं महायशाः ॥१८॥
स निशायामथागम्य मेषमेकं जहार वै ।
मातृवद्वर्त्तते सा तु मेषयोश्चारुहासिनी ॥१९॥
गन्धर्वागमनं ज्ञात्वा शयनस्था यशस्विनी ।
राजानमब्रवीत्सा तु पुत्रो मे ह्रियतेति वै ॥२०॥
एवमुक्तो विनिश्चित्य नग्नस्तिष्ठति वै नृपः[४] ।
नग्नं द्रक्ष्यति मां देवी समयो वितथो भवेत् ॥२१॥
ततो भूयस्तु गन्धर्व्वा द्वितीयं मेषमाददुः ।
द्वितीयेऽपहृते मेषे ऐलन्देवी तमब्रवीत् ॥२२॥
पुत्रौ मम हृतौ राजन्ननाथाया इव प्रभो ।
एवमुक्तस्तदोत्थाय नग्नो राजा प्रधावितः ॥२३॥
मेषाभ्यां पदवीं राजन् गन्धर्व्वैर्व्युत्थितमथ[५] ।
उत्पादिता तु महती माया तद्भवनं महत् ॥२४॥

(१) यथा इत्यत्र ध्रुवमितिप्रयोगः साधीयान् अन्यथा राजानं त्यक्ष्यते यथेतिवाक्यस्य पुनरुक्तिदोषोऽनिवार्य्यः। अथवा अस्मात् श्लो-कार्द्धात् परं विश्वावसुवाक्यानि न सन्ति ।
(२) सहसेति क० ङ० च० छ० ज० ।
(३) वीर्य्यसिद्धये इति क० छ० ज० अयमप्यपपाठः ।
(४) नग्नस्तिष्ठन् स नोत्थित इतिप्रयोगोऽत्र सङ्गतः ।
(५) अत्र, मेषयोः पदवीन्तत्र गन्धर्व्वैर्दिव्यमायिभिरितिप्रयोगोऽपि युक्तः ।

मथित्वाग्निं त्रिधा कृत्वा स्वयमेव नराधिपः ।
दृष्ट्वा यज्ञैर्बहुविधैर्गतस्तेषां सलोकताम् ॥४४॥
वाप्ताय च स गन्धर्वैस्त्रेतायां स महायशाः ।
एकोऽग्निः पूर्वमासीद्धि ऐलस्त्रींस्तानकल्पयत् ॥४५॥
एवंप्रभावो राजासीदैलस्तु द्विजसत्तमाः ।
देशे पुण्यतमे चैव महर्षिभिरलङ्कृते ॥४६॥
राज्यं स कारयामास प्रयागे पृथिवीपतिः ।
उत्तरे यामुने तीरे प्रतिष्ठाने[१] महायशाः ॥४७॥
तस्य पुत्रा बभूवुर्हि षडिन्द्रोपमतेजसः ।
गन्धर्वलोके विदिता आयुर्धीमानमावसुः ॥४८॥
विश्वायुश्च श्रुतायुश्च शतायु[२] श्चोर्वशीसुताः ।
अमावसोस्तु वै जातो भीमो राजाथ विश्वजित् ॥४९॥
श्रीमान् भीमस्य दायादो राजासीत्काञ्चनप्रभः ।
विद्वांस्तु काञ्चनस्यापि सुहोत्रोऽभून्महाबलः ॥५०॥
सुहोत्रस्याभवज्जह्नुः केशिकागर्भसम्भवः ।
प्रतिगत्य ततो गङ्गा वितते यज्ञकर्म्मणि ॥५१॥
प्लावयामास तं देशं भाविनोऽर्थस्य दर्शनात्[३] ।
गङ्गया प्लावितं दृष्ट्वा यज्ञवाटं समन्ततः ॥५२॥
सौहोत्रिर्वरदः[४] क्रुद्धो गङ्गां संरक्तलोचनः ।

---

(१) प्रतिष्ठाने इति क० घ० ज० ।
(२) श्रुतायुरिति ख० ।
(३) दैशनात् इति घ० ।
(४) सौहोत्रिश्च ततः इति ख० ग० । अस्मिन् श्लोकार्द्धे समापकक्रियाया

अस्य गङ्गेऽवलेपस्य सद्यः फलमवाप्नुहि ॥५३॥
एतत्ते विफलं सर्व्वं पीतमम्भः(१) करोम्यहं ।
राजर्षिणा ततः पीतां गङ्गां दृष्ट्वा सुरर्षयः ॥५४॥
उपनिन्युर्महाभागा दुहितृत्वेन जाह्नवीं ।
यौवनाश्वस्य पौत्रीन्तु(२) कावेरीं जह्नुरावहत् ॥५५॥
युवनाश्वस्य शापेन गङ्गा येन(३) विनिर्ममे ।
कावेरीं सरितां श्रेष्ठां जह्नुभार्य्यामनिन्दितां ॥५६॥
जह्नुस्तु दयितं पुत्रं सुहोत्रं नाम धार्म्मिकं ।
कावेर्य्यां जनयामास अजकस्तस्य चात्मजः ॥५७॥
अजकस्य तु दायादो बलाकाश्वो महायशाः ।
बभूव मृगयः शीलः(४) कुशस्तस्यात्मजः स्मृतः ॥५८॥
कुशपुत्रा बभूवुश्च चत्वारो देववर्च्चसः(५) ।
कुशाश्वः कुशनाभश्च अमूर्त्तारयसो वसुः ॥५९॥
कुशस्तम्बस्तपस्तेपे पुत्रार्थी राजसत्तमः ।

उच्चनीयत्वेन, सौहोत्रिर्वरद, वा, सौहोत्रिश्च ततः इत्यत्र सौहोत्रिरब्रवीदितिपाठः समीचीनः ।

(१) सर्व्वेष्वादर्शपुस्तकेषु पीतमम्भ इत्यत्र भ्रमोत्पन्नपाठावर्त्तन्ते । यथा, पिवन्नभः इति क०, पिवन्तीभिः इति ख०, अपरः कि० इति ग०, पिवन्तंवः इति ङ०, पिवन्तंभं इति च०, पिवन्त्याभः इति छ०, पिवन्ताम इति ज० ।

(२) पुत्रीमिति ख० ।

(३) मङ्गायै न इति ङ० च० अयन्तु न सम्यक् ।

(४) बभूव च दयाशीलः इति ख० ।

(५) देववर्च्चसः इति ख० ग० ।

पूर्णे वर्षसहस्रे वै शतक्रतुमपश्यत ॥६०॥
स उग्रं तपसं दृष्ट्वा सहस्राक्षः पुरन्दरः ।
समर्थः पुत्रजनने स्वयमेवास्य शाश्वतः ॥६१॥
पुत्रत्वं कल्पयामास स्वयमेव पुरन्दरः ।
गाधिर्नामाभवत्पुत्रः कौशिकः पाकशासनः ॥६२॥
पौरुकुत्साभवद्भार्या गाधिस्तस्यामजायत (१) ।
पूर्व्वं कन्यां महाभागां नाम्ना सत्यवतीं शुभां ।
तां गाधिः पुत्रः काव्याय ऋचीकाय ददौ प्रभुः ॥६३॥
तस्याः पुत्रस्त(२) वै भर्त्ता भार्गवो भृगुनन्दनः ।
पुत्रार्थे साधयामास चरुं गाधेस्तथैव च ॥६४॥
तथा चाहूय शिष्टति (३) ऋचीको भार्गवस्तदा ।
उपयोज्यश्चरुरयं त्वया मात्रा च ते शुभा (४) ॥६५॥
तस्यां जनिष्यते पुत्रो दीप्तिमान् क्षत्रियर्षभः ।
अजेयः क्षत्रियैर्युद्धे क्षत्रियर्षभसूदनः ॥६६॥
तवापि पुत्रं कल्याणि धृतिमन्तं तपोधनं ।
शमात्मकं द्विजश्रेष्ठं चरुरेष विधास्यति ॥६७॥

---

(१) जनयामास इत्यर्थे अजायतेत्यार्षः ।
(२) पुत्राय इति पाठ साधीयान् ।
(३) क० ङ० च० छ० ज० पुस्तकेषु शिष्टति इति अर्थशून्यपाठोवर्त्तते । ख० पुस्तके तथा राजा बालम्प्रतिरिति पाठः । ग० पुस्तके श्लोकार्द्धं नास्ति । शिष्टति इत्यत्र सुष्टतिमिति प्रयोगोऽर्थप्रतिपत्तिकरः ।
(४) शुभाः इति पाठः सर्व्वेषु आदर्शपुस्तकेषु विद्यते । अत्र शुभे इति सम्बोधनान्तप्रयोगः सङ्गतः ।

एवमुक्त्वा तु तां भार्य्यामृचीको भृगुनन्दनः ।
तपस्याभिरतो नित्यं अरण्यं प्रविवेश ह ॥६८॥
गाधिः सदारस्तु तदा ऋचीकाश्रममभ्यगात् ।
तीर्थयात्राप्रसङ्गेन सुतां द्रष्टुं नरेश्वरः ॥६९॥
चरुद्वयं गृहीत्वा तु ऋषेः सत्यवती सदा[1] ।
भर्त्तुर्वचनमव्यग्रा हृष्टा मात्रे न्यवेदयत् ॥७०॥
माता तु तस्यै दैवेन दुहित्रे स्वं चरुं ददौ ।
तस्याश्चरुमथाज्ञानादात्मना सा चकार ह ॥७१॥
अथ सत्यवती गर्भं क्षत्रियान्तकरं शुभं ।
धारयामास दीप्तेन वपुषा घोरदर्शना ॥७२॥
तामृचीकस्ततो दृष्ट्वा योगेनाप्यनुसृत्य च ।
तदाब्रवीद् द्विजश्रेष्ठः स्वां भार्य्यां वरवर्णिनीं ॥७३॥
मातुः सिध्यति ते भद्रे चरुव्यत्यासहेतुना[2] ।
जनिष्यति हि पुत्रस्ते क्रूरकर्मातिदारुणः ॥७४॥
माता जनिष्यते वापि[3] तथाभूतं तपोधनं ।
विश्वं हि ब्रह्म तपसा मया तत्र समर्पितं ॥७५॥

(१) तदा इति पाठोऽयुक्तः ।
(२) अत्र आदर्शपुस्तकमात्रे भ्रान्तिजनितपाठाः सन्ति । यथा, मात्रा सिद्ध्यन्ति ते सर्व्वे भद्रे चर्व्व्यात्यासात् इति च इति ख०, यात्रा सिद्ध्यन्ति ते सर्व्वे चर्व्वस्य मन्त्रेति च इति ग० । क० ङ० च० छ० ज० पुस्तकेषु, मात्रा सिद्ध्यन्ति ता भद्रे इति पाठः साधारणः । इतः परं चरु व्यत्यासहेतु स इति क०, चरुविन्यासहेतुनु इति ङ० च०, च तु व्यत्यासहेतुं तु इति छ० च तु व्यत्यास हेतु नुत इति ज०
(३) चापि इति ख० ग० ।

एवमुक्ता महाभागा भार्य्या सत्यवती तदा।
प्रसादयामास पतिं सुतो मे नेदृशो भवेत्।
ब्राह्मणापसदस्तत्र इत्युक्तो मुनिरब्रवीत् ॥७६॥
नैष सङ्कल्पितः कामो मया भद्रे तथा त्वया।
उग्रकर्म्मा भवेत् पुत्रः पितुर्मातुश्च कारणात् ॥७७॥
पुनः सत्यवती वाक्यमेवमुक्ताब्रवीदिदं।
इच्छन् लोकानपि मुने सृजेथाः किं पुनः सुतं ॥७८॥
शमात्मकमृजुं भर्त्तः पुत्रं मे दातुमर्हसि।
काममेवंविधः पौत्रो मम स्यात्तु वद[1] प्रभो ॥७९॥
मय्यन्यथा[2] न शक्यं वै कर्त्तुमेवं द्विजोत्तम।
ततः प्रसादमकरोत् स तस्यास्तपसो बलात् ॥८०॥
पुत्रे नास्ति विशेषो मे पौत्रे वा वरवर्णिनि।
त्वया यथोक्तं वचनं तथा भद्रे भविष्यति ॥८१॥
तस्मात् सत्यवती पुत्रं जनयामास भार्गवं।
तपस्यभिरतं दान्तं जमदग्निं शमात्मकं ॥८२॥
भृगोश्चरुविपर्य्यासे रौद्रवैष्णवयोः पुरा।
जमनाद्वैष्णवस्याग्नेर्जमदग्निरजायत[3] ॥८३॥
विश्वामित्रं तु दायादं गाधिः कुशिकनन्दनः।

---

(१) स्याद्वरद इति क० ज०।

(२) यद्यन्यथा इति क०, मह्यन्यथा इति ख०, ग० पुस्तके एतत् श्लोकार्द्धं नास्ति, दद्यन्यथा इति ङ० च०, पद्यन्यथा इति छ० झ०। एते सर्व्वे पाठाः लिपिकरप्रमादजनिताः।

(३) जमनाद्ब्रह्मणस्याग्नेर्जमदग्निरजायत इति ख०।

प्राप्य ब्रह्मर्षिसविता[१] जगाम ब्राह्मणः सुतः ॥८४॥
सा हि सत्यवती पुण्या सत्यव्रतपरायणा ।
कौशिकीति समाख्याता प्रवृत्तेयं महानदी ॥८५॥
परिश्रुता महाभागा कौशिकी सरितां वरा ।
इक्ष्वाकुवंशे त्वभवद्रेणुर्नाम पार्थिवः ॥८६॥
तस्य कन्या महाभागा कामली नाम रेणुका ।
रेणुकायान्तु कामल्यां तपोधृतिसमन्वितः ।
आर्चीकोजनयामास जमदग्निः सुदारुणं ॥८७॥
सर्वविद्यान्तगं श्रेष्ठं धनुर्वेदस्य पारगं ।
रामं क्षत्रियहन्तारं प्रदीप्तमिव पावकं ॥८८॥
और्वस्यैवमृचीकस्य[२] सत्यवत्यां महात्मनः[३] ।
जमदग्निस्ततोवीर्य्याज्जज्ञे ब्रह्मविदां वरः ।
मध्यमश्च शुनःशेफः शुनःपुच्छः कनिष्ठकः ॥८९॥
विश्वामित्रन्तु धर्मात्मा नाम्ना विश्वरथः स्मृतः ।
जज्ञे भृगुप्रसादेन कौशिकाद्वंशवर्द्धनः[४] ॥९०॥
विश्वामित्रस्य पुत्रस्तु शुनःशेफोभवन्मुनिः ।
हरिश्चन्द्रस्य यज्ञे तु पशुत्वे नियतः स वै ।
देवैर्दत्तः स वै यस्माद्देवरातस्ततोभवत् ॥९१॥

---

(१) समतामिति ख० ग० ।
(२) आत्मजस्य च ऋचीकस्य इति ख० ग० ।
(३) महात्मनः इति ख० ।
(४) कौशिकवंशवर्द्धन इतिप्रयोगः साधुः ।

विश्वामित्रस्य पुत्रास्तु शुनःशेफोऽग्रजः स्मृतः ।
मधुच्छन्दोनयश्चैव[1] कृतदेवो[2] ध्रुवाष्टकौ ॥९२॥
कच्छपः पूरणश्चैव विश्वामित्रसुतास्तु वै ।
तेषां गोत्राणि बहुधा कौशिकानां महात्मनां ॥९३॥
पार्थिवा देवरातास्च याज्ञवल्क्याः समर्षणाः ।
उदुम्बरा उदुम्लानास्तारका यमसुस्रुताः[3] ॥९४॥
लोहिण्योरेणवश्चैव तथा कारीषवः[4] स्मृताः ।
बभ्रवः पाणिनश्चैव ध्यानजप्यास्तथैव च ॥९५॥
श्यालावत्या हिरण्याक्षाः संकृता गालवाः स्मृताः[5] ।
देवला यामदूताश्च शालङ्कायनबाष्कलाः ॥९६॥
ददातिवादराश्चान्ये विश्वामित्रस्य धीमतः ।
ऋष्यन्तरविवाह्यास्ते बहवः कौशिकाः स्मृताः ॥९७॥
कौशिकाश्चाश्मरश्चैव[6] तथान्ये सैन्धवायनाः[7] ।
पौरोरवस्य पुत्रस्य ब्रह्मर्षेः कौशिकस्य तु ॥९८॥
दृषद्वतीसुतश्चापि विश्वामित्रात्तथाष्टकः ।
अष्टकस्य सुतो लौहिः प्रोक्तो जह्नुगणो मया ॥९९॥

---

(१) मधुच्छन्दो यमश्चैव इति ख०, जयश्चैवेति ङ० च० ।
(२) कृतदेवो इति ङ० च० ।
(३) शाङ्कायनभवाश्चथा इति ख०, एतच्छ्लोकार्ध० पुस्तके नास्ति, यतु-सुस्रुताः इति क० अ०, स्यतुसुस्रुता इति छ० ।
(४) कारिषवः इति क० अ० ।
(५) श्यालाय आहिरण्याक्षः संकृता गालवः स्मृत इति क० छ० अ० ।
(६) कौशिकाश्चाश्मताश्चैवेति ङ० छ० ।
(७) सौधवायना इति क०, अ० ।

ऋषय ऊचुः । किं लक्षणेन धर्म्मेण तपसेह श्रुतेन वा ।
ब्राह्मण्यं[1] समनुप्राप्तं विश्वामित्रादिभिर्नृपैः ॥१००॥
येन येनाभिधानेन ब्राह्मण्यं क्षत्रिया गताः ।
विशेषं ज्ञातुमिच्छामि तपसा दानतस्तथा ॥१०१॥
एवमुक्तस्ततोवाक्यमब्रवीदिदमर्थवत् ।
अन्यायोपगतैर्द्रव्यैराहृत्य यजते धिया[2] ।
धर्म्माभिकाङ्क्षी यजते न धर्म्मफलमश्नुते ॥१०२॥
धर्म्मं चैतं समाख्याय पापात्मा पुरुषाधमः ।
ददाति दानं विप्रेभ्यो लोकानां दम्भकारणात् ॥१०३॥
अपकृत्वा[3] तथा तीव्रं धनलोभान्निरङ्कुशः ।
रागमोहान्वितोह्यन्ते पात्रमार्थं ददाति यः ॥१०४॥
तेन दत्तानि दानानि अफलानि भवन्त्युत ।
तस्य धर्म्मप्रवृत्तस्य हिंसकस्य दुरात्मनः ॥१०५॥
एवं लब्ध्वा धनं मोहाद्ददतोयजतश्च ह ।
सङ्क्लिष्टकर्म्मणोदानं न तिष्ठति दुरात्मनः ॥१०६॥
न्यायागतानां द्रव्याणां तीर्थे सम्प्रतिपादनं ।
कामागनभिसन्धाय यजते च ददाति च ॥१०७॥
स दानफलमाप्नोति तच्च दानं सुखोदयं ।
दानेन भोगानाप्नोति स्वर्गं सत्येन गच्छति ॥१०८॥

---

(१) ब्रह्मण्यमिति ङ० च० ।
(२) दाङ्गय द्विजसत्तमान् इति क० छ० ज० ।
(३) अपहृत्येति पाठः सुसङ्गतः ।

तपसा तु सुसूक्ष्मेण लोकान् विष्टभ्य तिष्ठति ।
विष्टभ्य स तु तेजस्वी लोकेष्वानन्त्यमश्नुते ॥१०८॥
दानाच्छ्रेयस्तथा यज्ञो यज्ञाच्छ्रेयस्तथा तपः ।
सन्न्यासस्तपसः श्रेयांस्तस्माद्‌ज्ञानं गुरु स्मृतं ॥११०॥
श्रूयन्ते हि तपःसिद्धाः क्षात्रोपेता द्विजातयः ।
विश्वामित्रो नरपतिर्मान्धाता संकृतिः कपिः ॥१११॥
कपेश्च(१) पुरुकुत्सश्च सत्यश्चानुहवान् पृथुः(२) ।
आर्ष्टिषेणोऽजमीढश्च भागान्योन्यस्तथैव च ॥११२॥
कक्षीवांश्चैव शिञ्जयस्तथान्ये च महारथाः ।
रथीतरश्च रुन्द्रश्च विष्णुवृद्धादयो नृपाः ॥११३॥
क्षात्रोपेताः स्मृता ह्येते तपसा ऋषितां गताः ।
एते राजर्षयः सर्व्वे सिद्धिं सुमहतीं गताः ।
अत ऊर्द्धं प्रवक्ष्यामि आयोर्वंशं महात्मनः ॥११४॥

इति श्रीमहापुराणे वायुप्रोक्ते चन्द्रवंशकीर्त्तनं नाम
ऊनत्रिंशोऽध्यायः समाप्तः ॥

(१) कपे इति पाठो लेखकप्रमादजनितः। अथवा कपेरिति पदप्रयोगस्य तात्पर्य्यार्थावगतिरिति दुरूहा ।
(२) सत्यश्चाद्भुतवान् प्रभुरिति क० ख० ग० ।

अथ त्रिंशोऽध्यायः।

चन्द्रवंशकीर्त्तनं।

सूत उवाच। एते पुत्रा महात्मानः पञ्चैवासन् महाबलाः।
स्वर्भानुतनयाः विप्राः[१] प्रभायां जज्ञिरे नृपः॥१॥
नहुषः प्रथमस्तेषां पुत्रधर्मा ततः स्मृतः।
धर्मवृद्धात्मजश्चैव सुतहोत्रो[२] महायशाः॥२॥
सुतहोत्रस्य दायादास्त्रयः परमधार्म्मिकाः।
काशः शलश्च द्वावेतौ तथा गृत्समदः[३] प्रभुः॥३॥
पुत्रो गृत्समदस्यापि शुनको यस्य शौनकः।
ब्राह्मणाः क्षत्रियाश्चैव वैश्याः शूद्रास्तथैव च॥४॥
एतस्य वंशे सम्भूता[४] विचित्रैः कर्म्मभिर्द्विजाः।
शलात्मजो ह्यार्ष्टिषेणश्चरन्तस्तस्य चात्मजः॥५॥
शौनकाश्चार्ष्टिषेणाश्च क्षत्रोपेता द्विजातयः।
काशस्य काशयो राष्ट्रः पुत्रो दीर्घतपास्तथा॥६॥
धर्मश्च दीर्घतपसो विद्वान् धन्वन्तरिस्ततः।
तपसा सुमहातेजा जातो वृद्धस्य धीमतः।

---

(१) विप्रा इत्यत्र त्रेधा इति अर्थशून्यपाठः आदर्शपुस्तकमात्रेऽस्ति।
(२) सुनहोत्र इति क० ङ० च०।
(३) गृत्समदः इति ङ०, गृत्समयः इति क०। एष श्लोकः ख० ग०-पुस्तकयोर्नास्ति।
(४) तस्य वंशे समुद्भूता इति ङ० च०।

अथैनमृषयः प्रोचुः सूतं वाक्यमिदं पुनः ॥७॥

ऋषय ऊचुः । कथं धन्वन्तरिर्देवो मानुषेष्विह जज्ञिवान् ।

एतद्वेदितुमिच्छामस्ततो ब्रूहि प्रियं तथा ॥८॥

सूत उवाच । धन्वन्तरेः सम्भवोऽयं श्रूयतामिह वै द्विजाः ।

स सम्भूतः समुद्रान्ते[1] मथ्यमानेऽमृते पुरा ॥९॥

उत्पन्नः कलशात् पूर्वं सर्वतश्च श्रिया वृतः ।

सर्वसंसिद्धकार्यं तं दृष्ट्वा विष्टभितः स्थितः ।

अब्जस्त्वमिति होवाच तस्मादब्जस्तु सः स्मृतः ॥१०॥

अब्जः प्रोवाच विष्णुं तं तनयोऽस्मि तव प्रभो ।

विधत्स्व भागं स्थानञ्च मम लोके सुरोत्तम ॥११॥

एवमुक्तः स दृष्ट्वा तु तथा प्रोवाच स[2] प्रभुः ।

कृतो यज्ञविभागस्तु यज्ञियैर्हि सुरैस्तथा ॥१२॥

वेदेषु विधियुक्तश्च विधिहोत्रं महर्षिभिः ।

न शक्यमिह होमो वै तुभ्यं कर्त्तुं कदाचन ॥१३॥

अर्वाक्सुतोऽसि हे देव नासमन्त्रोऽसि वै प्रभोः ।

द्वितीयायान्तु सम्भूत्यां लोके ख्यातिङ्गमिष्यसि ॥१४॥

अणिमादियुता सिद्धिर्गर्भस्थस्य भविष्यति ।

तेनैव च शरीरेण देवत्वं प्राप्स्यसि प्रभो ।

चरुमन्त्रैर्व्रतैर्गन्धैर्यक्ष्यन्ति त्वां द्विजातयः ॥१५॥

---

(१) समुद्रान्ते इत्यत्र समुद्रान्त-इतिपाठः साधीयान् ।

(२) आदर्शपुस्तकमात्रे स इति पाठोऽस्ति अत्र स इतिपदस्थानेन तमितिपाठः समीचीनः ।

अथ च त्वं पुनश्चैव आयुर्वेदं विधास्यसि।
अवश्यभावी ह्यर्थोऽयं प्राग्दृष्टस्त्वब्जयोनिना॥१६॥
द्वितीयं द्वापरं प्राप्य भविता त्वं न संशयः।
तस्मात्[१] तस्मै वरं दत्त्वा विष्णुरन्तर्दधे ततः॥१७॥
द्वितीये द्वापरे प्राप्ते शौनहोत्रः प्रकाशिराट्[२]।
पुत्रकामस्तपस्तेपे नृपो दीर्घतपास्तथा॥१८॥
अब्जं देवन्तु पुत्रार्थी ह्याराधयिषुर्नृपः।
वरेण छन्दयामास प्रीतो धन्वन्तरिर्नृपं॥१९॥
नृप उवाच। भगवन् यदि तुष्टस्त्वं पुत्रो मे धृतिमान् भव।
तथेति समनुज्ञाय तत्रैवान्तरधीयत॥२०॥
तस्य गेहे समुत्पन्नो देवो धन्वन्तरिस्तदा।
काशिराजो महाराजः सर्व्वरोगप्रणाशनः॥२१॥
आयुर्वेदं भरद्वाजश्चकार सभिषक्क्रियं।
तमष्टधा पुनर्व्यस्य शिष्येभ्यः प्रत्यपादयत्॥२२॥
धन्वन्तरिसुतश्चापि केतुमानिति विश्रुतः।
अथ केतुमतः पुत्रो वीरो भीमरथो नृपः।
दिवोदास इति ख्यातो वाराणस्यधिपोऽभवत्॥२३॥
एतस्मिन्नेव काले तु पुरीं वाराणसीं पुरा।
शून्यां विवेशयामास क्षेमको नाम राक्षसः॥२४॥

(१) तस्मादित्यत्र एवं इतिपाठः साधुः।
(२) स काशिराट् इति ख· ग·।

अस्या हि सा पुरी पूर्व्वं निकुम्भेन महात्मना

शून्या वर्षसहस्रं वै भविष्यति पुनः पुनः ॥२५॥

तस्यां तु शप्तमात्रायां दिवोदासः प्रजेश्वरः ।

विषयान्ते पुरीं रम्यां गोमत्यां सन्न्यवेशयत् ॥२६॥

ऋषय ऊचुः । वाराणसीं किमर्थं तां निकुम्भः शप्तवान् पुरा ।

निकुम्भश्चापि धर्म्मात्मा सिद्धक्षेत्रं शशाप यः ॥२७॥

सूत उवाच । दिवोदासस्तु राजर्षिर्नगरीं प्राप्य पार्थिवः ।

वसते स महातेजाः स्फीतायां वै नराधिपः ॥२८॥

एतस्मिन्नेव काले तु कृतदारो महेश्वरः ।

देव्याः स प्रियकामस्तु वसानस्तु श्वशुरान्तिके ॥२९॥

देवाज्ञया पारिषदा विश्वरूपास्तपोधनाः ।

पूर्वोक्तै रूपविशेषैस्तोषयन्ति महेश्वरीं ॥३०॥

हृष्यति तैर्महादेवो मेना नैव तु हृष्यति ।

जुगुप्सते सा नित्यञ्च देवं देवीं तथैव च ॥३१॥

मम पार्श्वे त्वनाचार(१) स्तव भर्त्ता महेश्वरः ।

दरिद्रः सर्व एवेह ह्यक्लिष्टं लडतेऽनघे ॥३२॥

मात्रा तथोक्ता वरदा स्त्रीस्वभावान्न चाक्षमत् ।

स्मितं कृत्वा तु वरदा हरपार्श्वमथागमत् ॥३३॥

विवर्णवदना देवी महादेवमभाषत ।

नेह वत्स्याम्यहं देव नय मां स्वं निवेशनं ॥३४॥

---

(१) दुराचार इति ख० ग० ।

तथोक्तस्तु महादेवः सर्वान् लोकानवेक्ष्य च ।
वासार्थं रोचयामास पृथिव्यां तु द्विजोत्तमाः ।
वाराणसीं महातेजाः सिद्धक्षेत्रं महेश्वरः ॥३५॥
दिवोदासेन तां ज्ञात्वा निविष्टान्नगरीं भवः ।
पार्श्वस्थं स समाहूय गणेशं क्षेमकं[1] ब्रवीत् ॥३६॥
गणेश्वर पुरीं गत्वा शून्यां वाराणसीं कुरु ।
मृदुना चाभ्युपायेन अतिवीर्यः स पार्थिवः ॥३७॥
ततो गत्वा निकुम्भस्तु पुरीं वाराणसीं पुरा ।
स्वप्ने सन्दर्शयामास मङ्कनं नाम नापितं ॥३८॥
श्रेयस्तेऽहं करिष्यामि स्थानं मे रोचयानघ ।
मद्रूपां[2] प्रतिमां कृत्वा नगर्यन्ते निवेशय ॥३९॥
तथा स्वप्ने यथा दृष्टं सर्वं कारितवान् द्विजाः ।
नगरीद्वार्यनुज्ञाप्य राजानन्तु यथाविधि ॥४०॥
पूजा तु महती चैव नित्यमेव प्रयुज्यते ।
गन्धैर्धूपैश्च माल्यैश्च प्रेक्षणीयैस्तथैव च ॥४१॥
अन्नप्रदानयुक्तैश्च अत्यद्भुतमिवाभवत् ।
एवं सम्पूज्यते तत्र नित्यमेव गणेश्वरः ॥४२॥
ततो वरसहस्राणि नगराणां प्रयच्छति ।

---

(१) क्षेमकोऽब्रवीदिति ख० ।
(२) मद्रूपामित्यत्र, आदर्शपुस्तकमात्रे अर्थरहितपाठाः सन्ति । यथा, मेद्रूपामिति च०, मद्रूपामिति ख० ग०, मद्रूपामिति क० च० छ० ज० ।

पुत्रान् हिरण्यमायूंषि सर्वकामांस्तथैव च ॥४३॥
राज्ञस्तु महिषी श्रेष्ठा सुयशा नाम विश्रुता।
पुत्रार्थमागता साध्वी राज्ञा देवी प्रचोदिता ॥४४॥
पूजान्तु विपुलां कृत्वा देवी पुत्रमयाचत।
पुनः पुनरथागम्य बहुशः पुत्रकारणात् ॥४५॥
न प्रयच्छति पुत्रांस्तु निकुम्भः कारणेन तु।
राजा यदि तत कुप्येत ततः किञ्चित् प्रवर्त्तते ॥४६॥
अथ दीर्घेण कालेन क्रोधो राजानमाविशत्।
भूतं त्विदं महाद्वारि नगराणां प्रयच्छति ॥४७॥
प्रीत्या वरांश्च सततं किञ्चिन्तु प्रवर्त्तते।
मामकैः पूज्यते नित्यं नगर्यां मम चैव तु ॥४८॥
तथार्थितश्च बहुशो देव्या मे तत्र कारणात्।
न ददाति च पुत्रं मे कृतघ्नोऽयं कुभोजनः ॥४९॥
अतो नार्हति पूजान्तु मत्सकाशात् कथञ्चन।
तस्मात्तु नाशयिष्यामि तस्य स्थानं दुरात्मनः ॥५०॥
एवं तु स विनिश्चित्य दुरात्मा राजकिल्बिषी।
स्थानं गणपतेस्तस्य नाशयामास दुर्मतिः ॥५१॥
भग्नमायतनं दृष्ट्वा राजानमशपत् प्रभुः।
यस्मादृतेऽपराधं मे त्वया स्थानं विनाशितं ॥५२॥
अकस्मात् तु पुरी शून्या भविता ते नराधिप।
ततस्तेन तु शापेन शून्या वाराणसी तदा ॥५३॥
शप्तां पुरीं निकुम्भस्तु महादेवमथानयत्।

शून्यां पुरीं महादेवो निर्ममे परमात्मना ॥५४॥
तस्यां देवविभूत्यास्तु देव्याश्चैव महात्मनः ।
रमते तत्र वै देवी रममाणो महेश्वरः(१) ॥५५॥
न रतिं तत्र वै देवी लभते गृहविस्मयात् ।
देव्याः क्रीडार्थमीशानो (२)देवो वाक्यमथाब्रवीत् ॥५६॥
नाहं वेश्म विमोक्ष्यामि अविमुक्तं हि मे गृहं ।
प्रहस्यैनामथोवाच अविमुक्तं हि मे गृहं ॥५७॥
नाहं देवि गमिष्यामि गच्छ त्वेह रमाम्यहं ।
तस्मात्तदविमुक्तं हि प्रोक्तं देवेन वै स्वयं ॥५८॥
एवं वाराणसी शप्ता अविमुक्तं च कीर्त्तितं ।
यस्मिन् वसति वै देवः सर्वदेवनमस्कृतः ।
युगेषु त्रिषु धर्मात्मा सह देव्या महेश्वरः ॥५९॥
अन्तर्द्धानं कलौ याति तत्पुरन्तु महात्मनः ।
अन्तर्हिते पुरे तस्मिन् पुरी सा वसते पुनः ॥६०॥
एवं वाराणसी शप्ता निवेशं पुनरागता ।
भद्रश्रेण्यस्य(३) पुत्राणां शतमुत्तमधन्विनां ॥६१॥
हत्वा निवेशयामास दिवोदासो नराधिपः ।
भद्रश्रेण्यस्य राज्यन्तु हृतन्तेन बलीयसा ॥६२॥

---

(१) ऐश्वर्य्यात् सा तु विस्मिता इति क० ङ० ञ० ।
(२) ख० ग० छ० च० पुस्तकेषु पुनर्यामीति तां देवीं इतिपाठोऽस्ति । अयमपपाठः ।
(३) भद्रश्रेण्यस्येति क०, भद्रसेनस्येति ख० ग० ।

भद्रश्रेण्यस्य पुत्रस्तु दुर्दमो नाम नामतः ।
दिवोदासेन बालेति घृणया स विवर्जितः ॥६३॥
दिवोदासाद्दृषद्वत्यां वीरो जज्ञे प्रतर्दनः ।
तेन पुत्रेण बालेन प्रहृतं तस्य वै पुनः ॥६४॥
वैरस्यान्तं महाराज्ञा तदा तेन विधित्सता ।
प्रतर्दनस्य पुत्रौ द्वौ वत्सो भर्गश्च विश्रुतः ॥६५॥
वत्सपुत्रो ह्यलर्कस्तु सन्नतिस्तस्य चात्मजः ।
अलर्कं प्रति राजर्षिंगीतश्लोकौ पुरातनौ ॥६७॥
षष्टिवर्षसहस्राणि षष्टिवर्षशतानि च ।
युवा रूपेण सम्पन्नो ह्यलर्कः काशिसत्तमः ।
लोपामुद्राप्रसादेन परमायुरवाप्तवान् ॥६८॥
शापस्यान्ते महाबाहुर्हत्वा क्षेमकराक्षसं ।
रम्यामावासयामास पुरीं वाराणसीं नृप. ॥६९॥
सन्नतेरपि दायादः सुनीथो[१] नाम धार्मिकः ।
सुनीथस्य तु दायादः सुकेतुर्नाम धार्म्मिकः ॥७०॥
सुकेतुतनयश्चापि धर्मकेतु[२] रितिश्रुतिः ।
धर्मकेतोस्तु दायादः सत्यकेतुर्महारथः ॥७१॥
सत्यकेतुसुतश्चापि विभुर्नाम प्रजेश्वरः ।
सुविभुस्तु विभोः पुत्रः सुकुमारस्ततः स्मृतः ॥७२॥

(१) सुतीर्थ इति ख० ग० ।
(२) धर्म्मकेतु रिति ख० ग० ।

सुकुमारस्य पुत्रस्तु धृष्टकेतुः(१) सुधार्म्मिकः(२) ।
धृष्टकेतोस्तु दायादो वेणुहोत्रः प्रजेश्वरः ॥७३॥
वेणुहोत्रसुतश्चापि गार्ग्यो नाम विश्रुतः ।
गार्ग्यस्य गर्गभूमिस्तु(३) वात्स्यो वत्सस्य धीमतः ॥७४॥
ब्राह्मणाः क्षत्रियाश्चैव तयोः पुत्राः सुधार्म्मिकाः ।
विक्रान्ता बलवन्तश्च सिंहतुल्यपराक्रमाः ॥७५॥
इत्येते काश्यपाः प्रोक्ता रजेरपि निबोधत ।
रजेः पुत्रशतान्यासन् पञ्च वीर्य्यवतां भुवि ।
राजेयमिति विख्यातं क्षत्रमिन्द्रभयावहं ॥७६॥
तदा देवासुरे युद्धे समुत्पन्ने सुदारुणे ।
देवाश्चैवासुराश्चैव पितामहमथाब्रुवन् ॥७७॥
आवयोर्भगवन् युद्धे विजेता को भविष्यति ।
ब्रूहि नः सर्व्वलोकेश श्रोतुमिच्छामहे वयं ॥७८॥
ब्रह्मोवाच । येषामर्थाय संग्रामे रजिरात्तायुधः प्रभुः ।
योत्स्यते ते विजेष्यन्ति त्रींल्लोकान्नात्र संशयः ॥७९॥
रजिर्यतस्ततो लक्ष्मीर्यतो लक्ष्मीस्ततो धृतिः ।
यतो धृतिस्ततो धर्म्मो यतो धर्म्मस्ततो जयः ॥८०॥
तद्देवा दानवाः सर्व्वे ततः श्रुत्वा रजेर्जयं ।
अभ्ययुर्जयमिच्छन्तः स्तुवन्तो राजसत्तमं ॥८१॥

---

(१) दृढकेतुरिति ग० घ० ।
(२) सुधार्म्मिक इति ख० ।
(३) इतः परं श्लोकार्द्धपतनमवगम्यते ।

ते हृष्टमनसः सर्वे राजानं देवदानवाः ।
ऊचुरस्मज्जयाय त्वं गृहाण वरकार्मुकम् ॥८२॥
रजिरुवाच । जेष्यामि वो युद्धे देवान् शक्रपुरोगमान् ।
इन्द्रो भवामि धर्मात्मा ततो योत्स्यामि संयुगे ॥८३॥
दानवा ऊचुः । अस्माकमिन्द्रः प्रह्लादस्तस्यार्थे विजयामहे[1] ।
अस्मिंस्तु समये राजंस्तिष्ठेथा देव सोऽर्दितः ॥८४॥
स तथेति ब्रुवन्नेव देवैरप्यभिचोदितः ।
भविष्यसीन्द्रो जित्वेति देवैरपि निमन्त्रितः ॥८५॥
जघान दानवान् सर्वान् समस्तं[2] वज्रपाणिनः ।
स विप्रनष्टां देवानां परमश्रीः श्रियं वशी ॥८६॥
निहत्य दानवान् सर्वान् आजहार रजिः प्रभुः[3] ।
तं तथा तु रजिं तत्र देवैस्सह शतक्रतुः ॥८७॥
रजिपुत्रोऽहमित्युक्त्वा पुनरेवाब्रवीद्वचः ।
इन्द्रोऽसि राजन् देवानां सर्वेषां नात्र संशयः ।
यस्याहमिन्द्रपुत्रस्ते ख्यातिं यास्यामि शत्रुहन् ॥८८॥
स तु शक्रवचः श्रुत्वा वञ्चितस्तेन मायया ।
तथेत्येवाब्रवीद्राजा प्रीयमाणः शतक्रतुम् ॥८९॥
तस्मिंस्तु देवसदृशे दिवं प्राप्ते महीपतौ ।

---

(१) विनयामहे इति क० ज०
(२) ये वध्या इति क० छ० ।
(३) अस्मात् श्लोकात् परं कतिपयश्लोकपतनं सम्भाव्यते राज्ञा रजिनोक्त विषयस्याभावदर्शनात् ।